श्रीः ।

वेदान्तसारः ।

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसदानन्दयोगी-
न्द्रविरचितः । परमहंसपरिव्राजकाचार्य-श्री
नृसिंहसरस्वतीविरचितया टीकया, पण्डित
वर्यश्रीत्रिवेदोपाह्वश्रीभोलानाथात्मज-
पण्डित-रामस्वरूप-विरचितया
भाषाव्याख्यया च समलंकृतः ।

सोऽयं ग्रन्थः ।
श्रीकृष्णदासात्मजेन खेमराजेन
मुम्बय्यां
स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये
मुद्रयित्वा प्रकाशितः ।

शके १८२२, संवत् १९५७.

श्रीः ।

प्रस्तावना.

समस्त आत्मतत्त्वजिज्ञासु महाशयोंको विदित करनेमें आताहै कि, इस संसारका मूलतत्त्व क्या है? यह जाननेके लिये अध्यात्मशास्त्रसे अधिक बढकर कोई शास्त्र नहीं है. इस अध्यात्मशास्त्रके आचार्योंके भेदसे अनेक भेद हुए हैं. परंतु उन भेदभिन्न भेदवादियोंके अनेक मतोंसे मूल अद्वैत वेदांतसिद्धांत सबतरह अतिश्रेष्ठ है. जो कि अनादिकालसे अव्याहत चला आताहै. और वेदमूलक सिद्धान्तानुसारी महात्माओंने इसकीही प्रशंसा करीहुई देखीजाती है. जिसका मूल "नेह नानास्ति किंचन" "एकमेवाद्वितीयं ब्रह्म" इत्यादिश्रुतियां हैं.

इस अद्वैत वेदांतसिद्धांतके प्रतिपादक अनेक २ ग्रंथ आजतक छपकर जगह २ प्रसिद्ध हुए हैं. इन अनेक ग्रंथोंमें सब सिद्धांत बड़े विस्तारके साथ निरूपण कियेगए हैं. जिससे ज्ञान होनेके वास्ते बहुत परिश्रम करना पड़ता है. इसवास्ते परमहंसपरिव्राजकाचार्य सदानन्दयोगींद्रजीने "वेदांतसार" नामक ग्रंथ बनाया है. इस ग्रंथके ऊपर पं० श्रीनृसिंहसरस्वतीजीने बहुतही सरल संस्कृत टीका बनाई है- अब इस ग्रंथका सर्व साधारण और विना संस्कृत पढेहुए लोगोंको ज्ञान होनेके वास्ते हमने श्रीक्षेत्र काशीनिवासि पंडित "रामस्वरूप" जीसे सरल हिंदीभाषामें स्वरूपप्रकाश नामक टीका बनवायकर हमारे सुप्रसिद्ध "श्रीवेङ्कटेश्वर" छापाखानेमें छापकर प्रसिद्ध किया है.

अब हम आशा रखते हैं कि,—वेदांतशास्त्रके जिज्ञासु महाशय गण इस अत्यंत उपयोगी पुस्तकका अवश्य संग्रह करेंगे.

खेमराज श्रीकृष्णदास.

"श्रीवेङ्कटेश्वर" छापाखाना. (मुंबई.)

श्रीः ।

श्रीगोपीवल्लभेन जितम् ।

वेदांतसार ।

संस्कृतटीका और भाषाटीकासमेत ।

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ॥
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥ १ ॥

(सं०टी०) रामानंदं गुरुं नत्वा परमानन्दमद्वयम् । वक्ष्ये वेदान्तसारस्य टीकां नाम्ना सुबोधिनीम् ॥ १ ॥ इह खलु कश्चिन्महापुरुषो नित्याध्ययनविध्यधीतसकलवेदराशीनाश्चिन्मात्राश्रयत्वेन तद्रूपाद्वयानन्दविषयानाद्यनिर्वचनीयभावस्वरूपाज्ञानविलसितानंतभवानुष्ठितकाम्यनिषिद्धवर्जितनित्यनैमित्तिकप्रायश्चित्तोपासनाकर्म्मभिः सम्यक्प्रपन्नेश्वराणामिष्टिकाचूर्णादिसंघर्षितादर्शतलवदतिनिर्म्मलाशयानां नलिनीदलगतजलबिन्दुवद्धिरण्यगर्भादिस्तंबपर्यंतजीवजातं स्वात्मवन्मृत्योरास्यान्तर्गतं क्षणभंगुरं तापत्रयाग्निदंदह्यमानमहर्निशमात्मन्यनुपश्यतामतिविवेकिनां अत एवैहिकस्रक्चन्दनादिविषयभोगेभ्यः आमुष्मिकहिरण्यगर्भाद्यमृतभोगेभ्यश्च वाताशन इवातिनिर्विण्णमानसानां शमादिसाधनसंपन्नानामापाततोधिगताखिलवेदार्थत्वाद्देहाद्यहंकारपर्यन्तं जडपदार्थतद्विलक्षणस्वप्रकाशस्वरूपप्रत्यगात्मनि ब्रह्मानंदत्वे संशयापन्नानां तज्जिज्ञासूनामल्पश्रवणे-

न मूलाज्ञाननिवृत्तिपरमानंदावाप्तिसिद्धये प्रकरणमारभमाणःतत्समाप्तिप्रचयगमनादिफलकस्य शिष्टाचारपरिप्राप्तेष्टदेवतानमस्कारलक्षणमंगलाचरणस्यावश्यकर्तव्यतांप्रदर्शयँल्लक्षणयानुबंधचतुष्टयं निरूपयन्परमात्मानंनमस्कुरुतेऽखंडमित्यादिना॥ अखंडमिति॥ अभीष्टस्य निःश्रेयसःसिद्धये प्राप्त्यर्थमात्माश्रये एकत्वेन प्रतिपद्य इत्यर्थः।नन्वविषयस्यात्मनः कथं प्रतिपत्तिरित्याशंक्याह। अखिलाधारमिति । अखिलस्य चराचरात्मकप्रपंचस्य विवर्ताधिष्ठानत्वेन कारणत्वाक्रांतं ब्रह्मैव प्रतिपद्येत न तु शुद्धमित्यर्थः । नन्वेवं च सति प्रतिपत्तिविषयत्वेन दृश्यत्वापत्तिरित्याशंक्याह। अवाङ्मनसगोचरमिति।"यतोवाचो निवर्तंते" इत्यादिश्रुतिभिरविषयत्वप्रतिपादनात्प्रतिपत्तिविषयत्वं कारणत्वोपलक्षितं ब्रह्मविषयत्वेनौपचारिकमिति भावः । ननु एवमपि ब्रह्मणः कारणत्वे मृत्पिंडवदनित्यत्वाशंकामपहरन्नाह। सदिति।नाशाभावोपलक्षितस्वरूपम्"सदेव सौम्येदमग्र आसीत्" इत्यादिश्रुतेः। ननु तथापि जडत्वापत्तिमाशंक्याह। चिदिति । स्वप्रकाशचैतन्यस्वरूपमिति यावत् । ननु तथाप्यपुरुषार्थत्वात्किमित्याश्रयणीयमित्यत आह। आनंदमिति । परमानंदरूपमित्यर्थः। ननु 'भक्षितेऽपि लशुने न शान्तो व्याधिः'इति न्यायेन प्रपञ्चस्याधिष्ठानव्यतिरिक्ततया प्रतीयमानत्वात्कथमद्वैतसिद्धिरित्याशंकां तूर्णीकुर्वन्नाह । अखंडमिति । सजातीयविजातीयस्वगतभेदशून्यमित्यर्थः। अत्र सच्चिदानंदमिति प्रयोजनम् । अखंडमिति विषयः।

शास्त्रविषययोः प्रतिपाद्यप्रतिपादकभावः संबंधः। तत्कामोऽधिकारीत्यनुबंधचतुष्टयमर्थादुक्तं भवति ॥ १ ॥

(भा०टी०) जो वाणी और मनसे पर और संसारका आधारस्वरूप पूर्णब्रह्म सच्चिदानन्द है उसको अपने इच्छित कार्य्यकी सिद्धिके अर्थ आश्रय करताहूँ ॥ १ ॥

अर्थतोऽप्यद्वयानन्दमतीतद्वैतभानतः ॥
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥२॥

(सं०टी०) किंच "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः॥" इत्यादिश्रुत्या गुरुनमस्कारस्यापि शास्त्रांगत्वप्रतिपादनात्तन्नमस्कारोपि अवश्यं पृथक्त्वेन कार्य इति तन्नतिपूर्वकमभिधेयग्रन्थं प्रतिजानीते। अर्थतोपीति। अपिशब्देन न केवलं शब्दतः डित्थकपित्थादिवत्संज्ञामात्रं व्यवस्थितमपि तु अर्थतः शब्दतश्चेति अद्वयानंदान् गुरूनाराध्य वेदांतसारं यथामति वक्ष्य इत्यन्वयः। अद्वयश्चासावानंदश्चाद्वयानंदस्तानद्वयानंदान्। अत्र हेतुमाह। अतीतद्वैतभानत इति। अतीतं गतं द्वैतभानं यतः तस्मादतीतद्वैतभानतः निरस्तसमस्तभेदज्ञानत्वादित्यर्थः। तान्गुरूनाराध्य कायवाङ्मनोभिर्नमस्कारगोचरीकृत्य वेदांतसारं वेदांतानामुपनिषद्वाक्यजातानां मध्ये यत्सारं सिद्धांतरहस्यं यस्मिन् ज्ञाते पुनर्ज्ञातव्यं नावशिष्यते तं वेदान्तसारं यथामति

---

१ आदरार्थे बहुवचनमिति शिष्टोपदेशाद्गुरावादरात्तानिति बहुवचननिर्देशोऽत्रावगन्तव्यः।

बुद्धिमनतिक्रम्य वक्ष्ये प्रतिपादयिष्ये इत्यर्थः ॥ २ ॥

(भा०टी०) जिनको कदापि द्वैतभान नहीं होयहै ऐसे अद्वैतस्वरूप अद्वयानन्दनामवाले गुरुदेवको नमस्कार करके वेदान्तशास्त्रका सारभूत " वेदान्तसार " नामक ग्रन्थको बनाताहूँ ॥ २ ॥

वेदान्तो नाम उपनिषत्प्रमाणम् ॥ तदुपकारीणि शारीरकसूत्रादीनि च ॥ ३ ॥

(सं०टी०) इदानीं सर्वस्यापि वस्तुविचारस्योद्देशपूर्वकत्वात्प्रतिज्ञातं वेदांतं नामतो निर्दिशति । वेदान्त इति ।उपनिषद एव प्रमाणमुपनिषत्प्रमाणं उपनिषदो यत्र प्रमाणमिति वा। तदुपकारीणि वेदांतवाक्यसंग्राहकाणिशारीरकसूत्रादीनि"अथातो ब्रह्मजिज्ञासा" इत्यादीनि सूत्राणि।आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यंते।तेषामप्युपनिषच्छब्दवाच्यत्वादिति भावः ॥ ३ ॥

(भा०टी०) स्वतःसिद्ध प्रमाणस्वरूप उपनिषदोंका नाम वेदान्त है तथा प्रमाणस्वरूप उपनिषदोंके अनुकूल जो मीमांसारूप शारीरक सूत्रको आदिले अध्यात्मशास्त्र हैं वे भी वेदान्त नामसे कहे जाते हैं ॥ ३ ॥

अस्य वेदान्तप्रकरणत्वात्तदीयैरेवानुबन्धैस्तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः ॥४॥

(सं०टी०) ननु यद्यप्यवांतरानुबंधचतुष्टयमापाद्य नि-

दिष्टं तथापि परमानुबंधचतुष्टयस्यानिरूपितत्वादत्र प्रेक्ष्यावतां प्रवृत्तिर्न स्यादित्यत आह । अस्येति । अस्य वेदान्तसारस्येत्यर्थः ॥ ४ ॥

(भा० टी०) यह ग्रन्थ वेदान्तशास्त्रके अन्तर्गत है इसकारण वेदान्तशास्त्रके अन्य ग्रन्थोंके पढ़नेसे जो फल होताहै वही फल इस वेदान्तसारके पढ़नेसभी होताहै इसी कारण वेदान्तके अन्य ग्रन्थोंमें जो चार अनुबन्ध (अधिकारी, विषय, सम्बन्ध, प्रयोजन,) कहेहैं उनही चार अनुबन्धोंके द्वारा इस ग्रन्थकी अनुबन्धकार्य्यसिद्धि होजातीहै इसकारण इस ग्रन्थमें अन्य अनुबन्धोंके विचारका कोई प्रयोजन नहींहैं ॥ ४ ॥

तत्रानुबन्धो नाम अधिकारिवि-
षयसम्बन्धप्रयोजनानि ॥ ५ ॥

(सं० टी०) ननु वेदान्तशास्त्रस्यापि किमनुबंधचतुष्टयं येनास्यापि तद्वत्तासिद्धिरित्याशङ्क्य मूलशास्त्रस्यानुबंधचतुष्टयमाविष्करोति ॥ तत्रेति ॥ ५ ॥

(भा०टी०) अधिकारी, विषय, सम्बन्ध, प्रयोजन, इसीको वेदान्तमें अनुबन्धचतुष्टय कहते हैं । इन्हीं चार अनुबन्धोंको लेकर वेदान्तशास्त्र प्रवृत्त होताहै ॥ ५ ॥

अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वे
नापाततोऽधिगताखिलवेदार्थोऽस्मिन्
जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्ज-

नपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपा-
सनाऽनुष्ठानेन निर्गतनिखिलकल्मष-
तया नितान्तनिर्मलस्वान्तः साधनच-
तुष्टयसम्पन्नः प्रमाताधिकारी ॥ ६ ॥

(सं० टी०) अनुबन्धचतुष्टयमेवाह। यथोद्देशमधिकारिणं लक्षयति।अधिकारी त्विति। "स्वाध्यायोऽध्येतव्यः" इति वचनात्त्रैवर्णिकानामुपनीतानामध्ययनं नियमेन विधीयते।अध्ययनविधिप्रयुक्तमेवाध्ययनं नाध्यापनविधिप्रयुक्तम्।तथा चाधीतोवेदो वेदांगानि च शिक्षाकल्पव्याकरणछंदोज्योतिषनिरुक्ताख्यानि यतस्तेनापाततोधिगताखिलवेदार्थः । अत्र सर्ववेदार्थरहस्ये ज्ञाते सति उत्तरग्रन्थवैयर्थ्यपरिहारायापातत इत्युक्तम् । नन्वनधीतवेदानामपि विदुरादीनांतत्वज्ञानोत्पत्तिदर्शनादेवाध्ययनतत्प्रयुक्तकर्मानुष्ठानवैयर्थ्यमाशंक्योत्तरमाह । जन्मांतर इति। तेषामाधुनिकाध्ययनाद्यभावेपि जन्मांतरीयाध्ययनादिनिमित्तपरिपाकवतामस्मिञ्जन्मनि विनाप्यध्ययनादिना ज्ञानोत्पत्तौ बाधकाभावान्नाध्ययनादिवैयर्थ्यमिति भावः।काम्येति । काम्यस्यापि कर्मणो धर्म्मसाधनत्वेपि यातायातसंपादकत्वेन बन्धकत्वात् निषिद्धवत्तद्वर्ज्जनपुरःसरमित्युक्तम् । तथाच नित्यादिकर्म्मानुष्ठानेनिर्गतनिखिलकल्मषतयानिःशेषनिरस्तसकलकल्मषत्वेन । अत्र निखिलपदं काम्यनिषिद्धजनितसुकृतदुष्कृतपरम्।तेन नितांतनिर्म्मलस्वान्तः नितांतमत्यंतं निर्म्मलं स्व-

च्छं स्वान्तमन्तःकरणं यस्य स तथोक्तः वक्ष्यमाणसाधनचतु-
ष्टयसंपन्नःप्रमाता अंतःकरणेप्रतिबिंबितं चैतन्यमित्यर्थः॥ ६ ॥

(भा०टी०)(स्वाध्यायोऽध्येतव्यः-सर्वदा स्वाध्यायाच-
रण करना चाहिये) इस प्रकार वेदोक्त विधिवाक्योंके अ-
नुसार जिसको वेद (ऋक्,यजुः,साम,अथर्व,) वेदाङ्ग (शि-
क्षा, कल्प, व्याकरण, निरुक्त, छन्द, ज्योतिष,) अध्ययन
करके सामान्यतः सकल वेदार्थ प्राप्त होगया है। तथा जिस-
का इस जन्ममें तथा जन्मान्तरमें काम्य और निषिद्ध कर्म्म
परित्याग करके नित्य,नैमित्तिक, प्रायश्चित्त और उपासना इ-
त्यादि कार्य्योंके अनुष्ठान करनेसे सम्पूर्ण पापोंका नाश होने-
से अन्तःकरण अत्यन्त निर्म्मल होगयाहै । तथा जो पुरुष
साधनचतुष्टयसम्पन्न है वह पुरुष ईश्वरतत्त्वके विचार करनेमें
अर्थात् वेदान्तशास्त्रमें अधिकरी होता है ॥ ६ ॥

काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि॥
निषिद्धानिनरकाद्यनिष्टसाधनानिब्रह्महननादीनि॥
नित्यानि अकरणे प्रत्यवायसाधनानि सन्ध्यावन्द-
नादीनि॥ नैमित्तिकानिपुत्रजन्माद्यनुबन्धीनिजाते-
ष्ट्यादीनि ॥ प्रायश्चित्तानि पापक्षयमात्रसाधना-
नि चान्द्रायणादीनि । उपासनानि सगुणब्रह्मविषय
कमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि ॥
एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनम्।
उपासनानान्तुचित्तैकाग्र्यम् ॥ "तमेतमात्मानं

वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन" इत्यादिश्रुतेः "तपसा कल्मषं हन्ति" इत्यादिस्मृतेश्च। नित्यनैमित्तिकयोरुपासनानाञ्च अवान्तरफलं पितृलोकसत्यलोकप्राप्तिः "कर्म्मणा पितृलोको विद्यया देवलोकः" इत्यादिश्रुतेः ॥ ७ ॥

(सं०टी०) एतदेव स्पष्टं व्याकरोति ॥ काम्यानि स्वर्गादीनि ॥ ७ ॥

(भा०टी०) स्वर्गादिसुखप्राप्तिका कारणरूप—अग्निष्टोमादि यज्ञका नाम काम्यकर्म्म है। नरकादि दुःखभोगका साधन—ब्राह्मणवधादि निषिद्धकर्म्म कहाताहै। जिनके न करनेसे अनेक पाप उत्पन्न होजायँ, ऐसे सन्ध्यावन्दनआदि नित्य कर्म्म कहातेहैं। पुत्रोत्पत्ति आदि कर्म्मोंके उद्देशसे किये-जायँ ऐसे जातेष्टि आदि कार्योंको नैमित्तिक कर्म्म कहते-हैं। जिनके करनेसे पापोंका नाश हो ऐसे चान्द्रायण आदि व्रत प्रायश्चित्त कहाते हैं। सगुण ब्रह्मविषयक चित्तकीएकाग्रतारूप शान्तिआदि विद्या (शाण्डिल्यविद्या) को उपासना कहतेहैं। उपरोक्त नित्य,नैमित्तिक, प्रायश्चित्त इनका केवल चित्तशुद्धिके निमित्त प्रयोजन है। उपासनाका मुख्य प्रयोजन केवल चित्तकी एकाग्रताके निमित्त है। अन्तःकरणकी निर्म्मलता होनेपर पहले कहेहुए नित्य आदि कार्य्यों-का कोई प्रयोजन नहीं रहता है। इस विषयमें श्रुति प्रमाण है—"वेद पढ़ना यज्ञ करना तप करना और अनशन (चान्द्रा-

यण) आदि व्रत करनेसे ब्राह्मणगण परमात्माके जाननेकी इच्छा करते हैं" । इस विषयमें स्मृतिभी प्रमाण है-"तप करनेसे अनेक पापोंका नाश होता है" । और नित्य, नैमित्तिक, उपासनाका कुछ प्रासङ्गिक फल होताहै । क्योंकि श्रुतिने कहा है-"कर्म्मद्वारा पितृलोकप्राप्ति होतीहै और तपस्या, और उपासनाद्वारा देवलोककी प्राप्ति होतीहै"॥ ७॥

साधनानि नित्यानित्यवस्तुविवेकेहामुत्रफलभोगविरागशमदमादिसम्पत्तिमुमुक्षुत्वानि॥८॥

(भा०टी०) पूर्वोक्त साधनचतुष्टयको दिखलातेहैं । नित्य और अनित्य वस्तुका विचार । इस लोकमें और परलोकमें फल भोगनेकी इच्छा न करना । शम दम आदि साधनसम्पत्ति । मुमुक्षुत्व (मोक्ष होनेकी इच्छा होना) । यही साधनचतुष्टय कहाते हैं ॥ ८ ॥

नित्यानित्यवस्तुविवेकस्तावद्ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमितिविवेचनम् ॥ ९ ॥

(भा०टी०) इस संसारमें केवल ब्रह्मही नित्य है उससे भिन्न समस्त वस्तु अनित्य हैं । इस प्रकार विचारको नित्यानित्यवस्तुविवेक कहतेहैं ॥ ९ ॥

ऐहिकानां स्रक्चन्दनादिविषयभोगानांकर्म्मजन्यतया अनित्यत्ववदामुष्मिकानामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रफलभोगविरागः ॥ १० ॥

(भा०टी०) जिस प्रकार कर्म्मानुसार प्राप्त होनेवाला इस संसारका माला चन्दनादि भोग अनित्य है इसी प्रकार के अनुसार प्राप्त होनेवाला परलोकका (स्वर्गादिका) अमृतादि भोगभी अनित्य है इस प्रकार अत्यन्त दोनों लोकोंके भोगकी इच्छाकी निवृत्तिही कल्याण करनेवाली है इस प्रकारके बुद्धिको इहामुत्रफलभोगविराग कहतेहैं ॥ १० ॥

शमदमादयस्तु शमदमोपरतिति
तिक्षासमाधानश्रद्धाः ॥ ११ ॥

(भा०टी०) अब शमदमादिका निरूपण करतेहैं- शम, दम, उपरति, तितिक्षा, समाधान, और श्रद्धा, इनको शमदमादि नामसे व्यवहार करतेहैं ॥ ११ ॥

शमस्तावत् श्रवणादिव्यतिरिक्त
विषयेभ्यो मनोनिग्रहः ॥ १२ ॥

(सं०टी०) तत्र शमं लक्षयति। शमस्तावदिति। तथा तीव्रायां बुभुक्षायां भोजनादन्यो व्यापारो मनसो न रोचते भोजने विलंबं न सहते तथा स्रक्चन्दनादिविषयेष्वत्यंतमरुचिः। तत्त्वज्ञानसाधनेषु श्रवणमननादिष्वत्यंतमभिरुचिर्जायते तदा पूर्ववासनाबलाच्छ्रवणादिसाधनेभ्य उड्डीयमानंस्रक्चन्दनादि विषयेषु गम्यमान मनः येनांतःकरणवृत्तिविशेषेण निवर्त्यते स शम इत्यर्थः ॥ १२ ॥

(भा०टी०) ईश्वरविषयक श्रवण, मनन, निदिध्यासन-

से भिन्न जो अन्य विषयोंसे अन्तरिन्द्रिय (मन) का हटा-लेना वह शम कहाता है ॥ १२ ॥

दमःबाह्येन्द्रियाणां तद्व्यतिरिक्त-
विषयेभ्यो निवर्त्तनम् ॥ १३ ॥

(सं०टी०)इदानींदमस्यलक्षणमाह॥दमइति।ज्ञानसाधनश्रवणादिसाधनेभ्यो विलक्षणेषु शब्दादिविषयेषु प्रवर्तमानानि श्रोत्रादीनि बाह्येन्द्रियाणि येन वृत्तिविशेषेण निवर्तंते स दम इत्यर्थः ॥ १३ ॥

(भा०टी०) श्रोत्राआदि बाह्यइन्द्रियोंका ईश्वरविषयक श्रवणादिसे भिन्न विषयोंसे हटा लेना दम कहाता है ॥ १३ ॥

निवर्तितानामेतेषां तद्व्यतिरिक्तविषये-
भ्य उपरमणमुपरतिः। अथवा विहिता-
नां कर्म्मणां विधिना परित्यागः ॥ १४ ॥

(सं०टी०) इदानीमुपरतेर्लक्षणमाह। निवर्तितानामिति। निगृहीतानामेव तेषां बाह्येन्द्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु यथा तानींद्रियाणि सर्वथा नागच्छंति तथा तेषां निग्रहो येन वृत्तिविशेषेण क्रियते सोपरतिरित्यर्थः । उपरतेर्लक्षणांतरमाह। अथवेति। विहितानां नित्यादिकर्म्मणां विधिना चतुर्थाश्रमस्वीकारणकर्मणां परित्यागः नाहं कर्तेत्यवस्थानमुपरतिरित्यर्थः ॥ १४ ॥

(भा० टी०) तद्व्यतिरिक्त विषयोंसे हटाईहुई बाह्य

इन्द्रियोंका दमन करना अथवा विधिवाक्योंसे विहित कर्म्मों का विधिपूर्वक परित्याग उपरति कहाता है ॥ १४ ॥

तितिक्षा शीतोष्णादिसहिष्णुता ॥ १५ ॥

(सं०टी०) तितिक्षाया लक्षणमाह। तितिक्षेति । शरीरधर्म्मस्य शीतोष्णादेः तज्जन्यसुखदुःखादेश्च शरीरस्य त्यक्तुमशक्यत्वात् स्वप्रकाशचिद्रूपे स्वात्मनि च शीतोष्णादेरत्यंताभावादिति विवेकदीपेन मिथ्याभानस्य शीतोष्णादेर्द्वंद्वस्य यत्सहनं सा तितिक्षेत्यर्थः ॥ १५ ॥

(भा०टी०) शीत, उष्णता, सुख, दुःख इत्यादिके सहलेनेको तितिक्षा कहतेहैं ॥ १५ ॥

निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम् ॥ १६ ॥

(सं०टी०) इदानीं समाधानलक्षणमाह । निगृहीतस्य मनस इति। शब्दादिविषयेभ्यो निगृहीतस्यान्तःकरणस्य श्रवणादौ तदनुगुणेषु तदुपकारकेषु अमानित्वादिसाधनविषयेषु समाधिर्नैरंतर्येण तच्चिंतनं समाधानमित्यर्थः ॥ १६ ॥

(भा०टी०) ईश्वरविषयक श्रवणादि अथवा तत्सदृश और विषयोंद्वारा निगृहीत मनकी एकाग्रता अवस्था का नाम समाधान है ॥ १६ ॥

गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा ॥ १७ ॥

(सं०टी०) श्रद्धादयः स्पष्टार्थाः ॥ १७ ॥

(भा०टी०) गुरुदेवके वचनों में तथा उपनिषदादि वे-

दान्तशास्त्रके वाक्योंमें विश्वास करना श्रद्धा कहातीहै॥ १७॥

मुमुक्षुत्वं मोक्षेच्छा ॥ १८ ॥

(भा०टी) मोक्षमें जो इच्छा होती है उसको मुमुक्षुत्व कहतेहैं ॥ १८ ॥

एवम्भूतः प्रमाताऽधिकारी । "शान्तो दान्तः" इत्यादिश्रुतेः ॥ तथा चोक्तम्--"प्रशान्तचित्ताय जितेन्द्रियाय प्रक्षीणदोषाय यथोक्तकारिणे ॥ गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सकलं मुमुक्षवे" इति ॥ १९ ॥

(सं०टी०) तथाच पूर्वोक्तसकलविशेषणविशिष्टः प्रमाताधिकारीत्यर्थः। अस्मिन्नर्थे श्रुतिं प्रमाणयति। शांत इति॥ १९॥

(भा०टी०) जो पूर्वोक्त साधनचतुष्टययुक्त होताहै उसी को वेदान्तशास्त्रमें अधिकारी कहते हैं । इस विषयमें श्रुति और स्मृतिका प्रमाण दिखाते हैं--"जिसका चित्त शान्त हो, और जितेन्द्रिय हो,और भ्रम विप्रलिप्सादि दोषरहित, आज्ञाकारी, गुणवान्, सर्वदा अनुगत,और मोक्षकी इच्छा करनेवाला हो ऐसे शिष्यको सब विषयका उपदेश करना चाहिये" ॥ १९ ॥

विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयम् । तत्रैव वेदान्तानां तात्पर्य्यात् ॥ २० ॥

(सं०टी०)यथोद्देशं विषयं निरूपयति। विषय इति। अविद्याध्यारोपितसर्वज्ञत्वकिंचिज्ज्ञत्वादिविरुद्धधर्म्मपरित्यागे

नावशिष्टं शुद्धचैतन्यं ज्ञेयस्वरूपमेव सर्वेषां वेदांतवाक्यानां विषय इत्यर्थः ॥ २० ॥

(भा०टी०) जीवचैतन्य और ब्रह्मचैतन्यका ऐक्यस्वरूप शुद्धचैतन्यका प्रमेयभाग विषय है क्योंकि वेदान्तशास्त्रका इसी विषयमें तात्पर्य्य है ॥ २० ॥

सम्बन्धस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावलक्षणः ॥ २१ ॥

(सं०टी०) क्रमप्राप्तं संबंधं लक्षयति । संबंधस्त्विति । बोध्यबोधकभाव इति । बोध्यस्य ब्रह्मात्मैक्यस्वरूपस्य बोधकस्य वेदांतशास्त्रस्य च बोध्यबोधकभाव एव संबंध इत्यर्थः २१

(भा०टी०)जीव और ब्रह्मका ऐक्यरूप प्रमेयसहित तत्प्रतिपादकउपनिषदादि प्रमाणका बोध्यबोधक नाम सम्बन्धहै

प्रयोजनन्तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः । तत्स्वरूपानन्दावाप्तिश्च ॥ २२ ॥

(सं०टी०)अवशिष्टं प्रयोजनमाह । प्रयोजनं त्विति । ब्रह्मात्मैकत्वलक्षणचिन्मात्रगताज्ञानतत्कार्यसकलप्रपंचनिवृत्तिःपुनरुत्पत्त्यभावरूपस्वस्वरूपाखंडानंदप्राप्तिः फलमित्यर्थः । ननु लोके अप्राप्तस्य क्रियासाध्यस्य स्वर्गादेः पुरुषार्थत्वेन फलत्वं दृष्टम्, अत्र तु नित्यप्राप्तस्यात्मस्वरूपस्य क्रियासाध्यत्वाभावेन पुरुषार्थत्वाभावात्कथंफलत्वमिति चेन्न ।अप्राप्तस्यैव पुरुषार्थत्वनियमाभावात् । यथा लोके कस्यचिद्विस्मृत-

कंठमणेः तत्प्रयुक्तशोकाग्निसंदह्यमानस्याप्तोपदेशोत्तरकालं स्वकंठगतचामीकरप्राप्तेरपि पुरुषार्थत्वात्फलत्वं दृष्टमेवमत्रापि नित्यप्राप्तस्यात्मनः अज्ञानमोहान्धकारावृतत्वेन विस्मृतस्व-स्वरूपस्य पुरुषस्य गुरुश्रुतिवाक्यश्रवणानंतरमज्ञानमोहांधका-रनिवृत्तौ सत्यां स्वयंप्रकाशमानचिद्रूपस्य सिद्धस्यैवात्मनः फ-लत्वमुपचर्यत इति भावः ॥ २२ ॥

(भा०टी०) जीव ब्रह्मके एकता प्रमेय विषयक अ-ज्ञानकी निवृत्ति और उसका फलरूप आनन्दकी प्राप्तिका नाम वेदान्तशास्त्रमें प्रयोजन है ॥ २२ ॥

"तरति शोकमात्मवित्" इत्यादिश्रुतेः।
"ब्रह्म वेद ब्रह्मैव भवति" इत्यादिश्रुतेश्च ॥ २३॥

(सं०टी०) उक्तेर्थे श्रुतिं प्रमाणयति॥तरति शोकमा त्मविद्ब्रह्म वेदेत्यादीति ॥ २३ ॥

(भा० टी०) उपरोक्त विषयमें श्रुति प्रमाण है "आ-त्मज्ञानी शोकसे विमुक्त होजाताहै"। "जो ब्रह्मवेत्ता होता है वह ब्रह्मका स्वरूप होजाताहै" ॥ २३ ॥

अयमाधिकारी जननमरणादिसंसारानलसन्तप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं-ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिःश्रोत्रियं ब्रह्मनिष्ठम्" इत्यादिश्रुतेः। स गुरुः परमकृपया अध्या-रोपापवादन्यायेनैनमुपदिशति। "तस्मैविद्वानु-

पसन्नाय सम्यक्प्रशान्तचित्तायशमान्विताय येना- क्षरं पुरुषं वेद सत्यं प्रोवाच ता तत्त्वतो ब्रह्मविद्याम्'' इत्यादिश्रुतेः ॥ २४ ॥

(सं०टी०)अधुनाशास्त्रारंभनिमित्ताधिकार्यादिनिरूपणा- नन्तरं शास्त्रारंभं प्रस्तौति ।अथवाळक्षितस्याधिकारिणःकर्तव्यं- दर्शयति। अयमधिकारीइति । उक्तलक्षणलक्षितोबुद्धिसंनि- हितोधिकारी गुरुमुपसरतीत्यर्थः । ननु संसारासक्तचित्तस्य वि- षयलोलुपस्यार्तिरहितस्य गुरूपसर्पणमयुक्तमित्याशंक्याह ।सं- सारानलसंतप्त इति । संतापे हेतुमाह । जननेति । आदिशब्देन व्याध्यादयो गृह्यन्ते ।संतप्तस्यैव गुरूपसर्पणमित्यत्र दृष्टांतमाह। प्रदीप्तशिरा इति । अर्धदग्धमस्तको दाहनिवृत्तिकामो यथा शीतलं जलराशिमनुसरति तथा संसारतापत्रयदह्यमानस्तन्निवृ- त्तिकामः स्वस्वरूपजिज्ञासुः संसारनिवर्तकं श्रोत्रियं ब्रह्मनिष्ठं करतलामलकवत्स्वप्रकाशात्मस्वरूपसमर्पकं गुरुसमीपं गत्वा- नुसरति मनोवाक्कायकर्मभिः सेवत इत्यर्थः।अस्मिन्नर्थे श्रुतिमु- दाहरति। समित्पाणिरिति। अथ गुरुकृत्यमाह। स गुरुः परम- कृपयेति । स पूर्वोक्तो गुरुरेनं शिष्यमुपदिशतीत्यन्वयः।ननु प- रमरहस्यमपि ब्रह्मस्वरूपं कस्मादुपदिशतीत्यत आह।कृपयेति। कृपाव्यतिरेकेणसाधनांतराभावादित्यर्थः।नन्वखंडस्य ब्रह्मस्व- रूपस्यागोचरत्वेनोपदेष्टुमशक्यत्वात्कथमुपदिशतीत्यत आह। अध्यारोपेति । अखंडब्रह्मस्वरूपस्यागोचरत्वेन विधिमुखत्वेनो- पदेष्टुमशक्यत्वेपि"नेहनानास्तिकिंचन"इत्यादिश्रुतिमनुसृत्या-

विद्याध्यारोपितमिथ्यानानापदार्थनिषेधमुखेनोपलक्षितमखंड चैतन्यमेव पुनः "सत्यं ज्ञानमनंतं ब्रह्म" इत्यादिश्रुतिमनुसृत्य लक्षणयाविधिमुखेनाप्युपदिशतीति भावः। तत्र श्रुतिमाह। तस्मा इति ॥ २४ ॥

(भा०टी०) यह वेदान्तशास्त्रका अधिकारी जन्ममरणरूप संसाराग्निसे सन्तप्त होकर समिधादि उपहार हाथमें लेकर जिस प्रकार किसी पुरुषका शिर जलनेलगै है और वह जलाशयको जाय है इसीप्रकार वेदान्तके पारदर्शी ब्रह्मवेत्ता गुरुके समीप जाकर गुरुकी सेवा करै क्योंकि श्रुतिने ऐसा कहा है-"ब्रह्मनिष्ठ सद्गुरुके समीप जाय" परम कृपालु गुरु भी अध्यारोप और अपवाद न्यायद्वारा अर्थात् अखण्ड ब्रह्मस्वरूपका विधिवाक्योंद्वारा उपदेश नहीं होसके है इस कारण (नेह नानास्ति किञ्चन) इत्यादि श्रुतियोंका अनुसरण करके अविद्या करके भासित मिथ्या नाना पदार्थोंके निषेधद्वारा और (सत्यं ज्ञानमनन्तं ब्रह्म) इत्यादि श्रुतियोंका अनुसरण करके लक्षणाकरके विधिवाक्योंद्वारा शिष्यको उपदेश करे क्योंकि श्रुतिमें भी कहा है-"जिस विद्याके द्वारा सच्चिदानन्दमात्र पूर्णब्रह्मका परिज्ञान होय ब्रह्मवेत्ता गुरु उसही ब्रह्मविद्याद्वारा शिष्यको उपदेश करे" ॥ २४ ॥

असर्पभूते रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपः।वस्तु सच्चिदानन्दमद्वयं ब्रह्म। अज्ञानादिसकलजडसमूहः अवस्तु। अज्ञानं तु सदसद्भ्यामनिर्वचनीयं

त्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्किञ्चिदिति वदंति । अहमज्ञ इत्याद्यनुभवात् । "देवात्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादिश्रुतेश्च ॥ २९ ॥

(सं०टी०) अस्मिन्नर्थे लौकिकदृष्टांतमाह । असर्पभूतइति । व्यावहारिकवस्तुत्वेनाभिमतायां रज्जाववस्तुभूतसर्पारोपोनाम रज्ज्ववच्छिन्नचैतन्यविवर्तो रज्ज्ववच्छिन्नचैतन्यनिष्ठाविद्योपादानत्वेन नायं सर्पः किंतु रज्जुरिति विशेषदर्शनोत्तरकालीनाधिष्ठानरज्जुसाक्षात्कारेण रज्ज्वज्ञाननिवृत्तौ सर्पभ्रांतिर्निवर्तत इत्यर्थः । उक्तमर्थं दार्ष्टांतिके योजयति । वस्त्विति । कालत्रयानपायि आत्मैव वस्तुशब्दार्थः सा विद्या सर्पज्ञानाभासाकारेण परिणममाना सर्पाकारेण विवर्त्तते । अत्रावस्तुरूपमाह । अज्ञानादीति । अज्ञानतज्जन्यव्योमादेर्मिथ्यात्वात् दृश्यत्वात्सावयत्वाद्विकारित्वात्सापेक्षसिद्धिकत्वादित्यादिहेतुभिरवस्तुरित्यर्थः । एतदेव विस्तरेण प्रतिपादयितुमज्ञानस्वरूपं तावदाह । अज्ञानं त्विति । किमिदमज्ञानं सद्रूपमसद्रूपं वा । नाद्यः । तस्य शशविषाणतुल्यत्वेन तुच्छत्वात् । नापि द्वितीयः । असतःकारणत्वानुपपत्तेः । इत्यादिहेतुभिः सत्त्वेनासत्त्वेन वा निरूपयितुं न शक्यत इत्याह।अनिर्वचनीयमिति।नन्वज्ञानस्यानिर्वचनीयत्वे सर्वथा ज्ञातुमशक्यत्वात्तदभावप्रसंगमाशंक्याह । त्रिगुणात्मकमिति। "अजामेकाम्"इत्यादिश्रुतिभिः सत्वरजस्तमोगुणात्मकप्रतिपादनादित्यर्थः । नन्वेवमजस्याज्ञानस्य श्रुतिप्रसिद्धस्य व्योमादिरूपेण विततस्य सत्यवद्भा-

समानत्वेन संसारानिवृत्तिरित्याशंक्याह॥ज्ञानविरोधीति । एतादृशमप्यज्ञानमात्मसाक्षात्कारेण निवर्तत इत्यर्थः । तदुक्तं भगवता "दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यंते मायामेतां तरंति ते"इति।ज्ञानाभाव एवाज्ञानमिति तार्किकमतं निराकरोति । भावरूपमिति । त्रिगुणात्मकभावरूपत्वेपि इदमित्थमेवेति पिंडीकृत्य प्रदर्शयितुं न शक्यत इत्याह । यत्किंचिदिति। किमप्यघटितघटनापटीयसीत्यर्थः । अनिर्वचनीयभावरूपाज्ञानसद्भावेनुभवमेवोदाहृत्य दर्शयति । अहमज्ञ इति । अहमज्ञो मामहं न जानामीत्यपरोक्षावभास एव प्रमाणमित्यर्थः। तस्यैवोपष्टंभकत्वेन श्रुतिमुदाहरति । देवात्मशक्तिमिति ॥ २५ ॥

(भा०टी०) उपरोक्त न्यायके विषयमें लौकिक दृष्टान्त दिखावैंहैं । रज्जु किसी समयभी वस्तुतः सर्प नहीं होती है परन्तु जिस समय उसी रज्जुमें सर्पका भ्रम होयहै उसी अवस्तु में वस्तुके भ्रम को अज्ञान कहते हैं यही उपरोक्त अध्यारोप कहाता है । सच्चिदानन्दमय, अद्वितीय पूर्णब्रह्म वस्तु है और अज्ञानादि सकल जड़ पदार्थ समूह अवस्तु है । सत् और असत् से भिन्न सत्त्वगुण रजोगुण तमोगुणरूप ज्ञानका प्रतिवन्धक भावरूप जो कुछ पदार्थ है उसको अज्ञान कहैंहैं । इस विषयमें अनुभवही प्रमाण है जैसे मैं अज्ञ हूँ मैं आपको नहीं जानताहूँ यही अज्ञानका स्वरूप है । श्रुतिमेंभी

कहा है—दीप्तिमान आत्माकी शक्ति निज सत्त्वगुणआदि द्वारा वेष्टित होकर निगूढभावमें रहती है ॥ २५ ॥

इदमज्ञानंसमष्टिव्यष्ट्यभिप्रायेणैकमनेकमितिच-व्यवह्रियते । तथाहि—यथावृक्षाणांसमष्ट्यभि-प्रायेणवनमित्येकत्वव्यपदेशः ॥ यथा वा जला नां समष्ट्यभिप्रायेण जलाशय इति तथा नाना त्वेन प्रतिभासमानजीवगताज्ञानानां समष्ट्यभि-प्रायेण तदेकत्वव्यपदेशः । "अजामेकाम्" इत्यादिश्रुतेः । इयं समष्टिरुत्कृष्टोपाधितया विशु-द्धसत्वप्रधाना । एतदुपहितं चैतन्यंसर्वज्ञत्वसर्वे-श्वरत्वसर्वनियंतृत्वादिगुणकं सदसदव्यक्तमन्तर्या-मि जगत्कारणमीश्वर इति च व्यपदिश्यते । सकलाज्ञानावभासकत्वादस्य सर्वज्ञत्वम् । "यः सर्वः स सर्ववित्" इति श्रुतेः ॥ २६ ॥

(सं० टी०)अज्ञानं विभजते। इदमिति। वस्तुतोऽज्ञा-नस्यैकत्वेपि समष्ट्यभिप्रायेणैकमिति व्यवह्रियते । व्यष्ट्यभि-प्रायेणानेकमित्यर्थः । तदेव प्रपंचयितुं प्रतिजानीते । तथाहीति। यथा बहूनां वृक्षाणां समुदायविवक्षया वनमित्येकत्वव्यपदेशः यथा बहूनां नद्यादिजलानां समुदायविवक्षया जलाशय इत्ये कत्वव्यपदेशःतथांतःकरणोपाधिभेदेन नानात्वेन प्रतीयमानानां जीवगताज्ञानानां समुदायविवक्षयाऽज्ञानमित्येकत्वव्यपदेश इ-त्यर्थः । अस्मिन्नर्थे श्रुतिं प्रमाणयति। अजामिति । "अजा-

मेकांलोहितशुक्लकृष्णां बह्वीं प्रजां जनयंतीं सरूपाम्" इत्यादिश्रुतेः। नानाजीवगतनिकृष्टांतःकरणव्यष्ट्युपाध्यपेक्षया समष्ट्युपाधेरस्य वैलक्षण्यं दर्शयति। विगतरागादिदोषसकलकार्यप्रपंचस्य जगत्कारणभूतस्याज्ञानस्य समष्टिभूतोत्कृष्टोपाधित्वेन विशुद्धसत्वप्राधान्यमितिभावः। एतत्समष्ट्युपाधिद्वारेण ईश्वरचैतन्यं लक्षयति। एतदुपहितचैतन्यमिति। एतत्समष्ट्यज्ञानोपलक्षितं चैतन्यं सर्वस्य चराचरात्मकप्रपंचस्य साक्षित्वेन सर्वज्ञ इत्युच्यते। सर्वेषां जीवानां कर्म्मानुरूपेशितृत्वेनफलदातृत्वेनेश्वर इत्युच्यते। तथा सर्वेषां जीवानामंतर्हृदये स्थित्वा बुद्धिनियामकत्वेनांतर्यामीत्युच्यते प्रमाणागोचरत्वादव्यक्तमित्युच्यते। सर्वस्य चराचरात्मप्रपंचस्य विवर्ताधिष्ठानत्वेन जगत्कारणमिति व्यपदिश्यत इत्यर्थः। उक्तेऽर्थे युक्तिमाह। सकलेति। अत्र प्रमाणमाह। य इति ॥ २६ ॥

(भा० टी०) इस अज्ञानको समष्टिरूप (एक) व्यष्टिरूप (अनेक) बोलकर व्यवहार किया जाताहै। जिस वृक्षोंके समूहको समष्टिरूप (एक) वन ऐसा बोलते हैं तथा जलके समूहोंको समष्टिरूप (एक) जलाशय (तलाब) बोलते हैं। इसी प्रकार विभक्त और विराजित जीवोंके अज्ञानके समूहोंको समष्टिरूप (एक) अज्ञान शब्दसे बोलते हैं। श्रुतिमेंभी कहाहै "एकही अज्ञान जन्मरहित और त्रिगुणमयहै।" यही अज्ञान समष्टिरूप उत्कृष्ट उपाधिविशिष्ट है इसी कारण इसमें विशुद्ध सत्त्वगुण प्रधान है इसी अज्ञानसे उपहित

चैतन्यस्वरूप ब्रह्म, सर्वज्ञ सर्वेश्वर सर्वनियन्ता अव्यक्त अन्तर्यामी जगत्कारण और ईश्वर इन शब्दोंसे व्यवहार किया जाता है जो सम्पूर्ण अज्ञानके प्रकाशका हेतु है वही सर्वज्ञ है। श्रुतिमेंभी कहा है—"जो जगत्को सामान्यरूप और विशेषरूपसे जानता है वह सर्वज्ञ है,, ॥ २६ ॥

ईश्वरस्येयं समष्टिरखिलकारणात्वात्—कारणशरीरमानन्दप्रचुरत्वात् कोशवदाच्छादकत्वाच्चानन्दमयकोशः सर्वोपरमत्वात् सुषुप्तिः।अत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते, यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः, यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति, तथाऽज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः। "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादिश्रुतेः। अत्र समस्तव्यापित्वेन समष्टिव्यष्टिव्यपदेशः॥२७॥

(सं०टी०) इदानीं तस्यैवेश्वरस्य समुदायोपाधिरेव कारणशरीरत्वमानंदमयकोशत्वं सुषुप्त्यवस्थावैशिष्ट्यं च लभत इत्याह। ईश्वरस्येति। कारणशरीरत्वे हेतुमाह। अखिलेति। आनन्दमयत्वे हेतुमाह। आनंदप्रचुरत्वादिति। कारणावस्थायां प्रकृतिपुरुषमात्रव्यतिरिक्तस्य स्थूलसूक्ष्मकार्यप्रपंचस्यैवाभावादानंदबाहुल्यमिति कोशत्वे युक्तिमाह। आच्छादकत्वादिति।शरीराच्छादकचर्मवदात्माच्छादकत्वादज्ञानस्यैव कोश इति व्यवहारः। ननु तथापि कारणत्वोपाधेरज्ञा-

नस्य सुषुप्तित्वं कुत इत्यत आह । सर्वोपरमत्वादिति । सर्वस्य स्थूलसूक्ष्मोपाधेः कारणोपाधौ लीनत्वात्सुषुप्तित्वमित्यर्थः ननु स्थूलसूक्ष्मप्रपंचलयस्थानस्य कथं सुषुप्तित्वमित्याशंक्यसंज्ञाभेद इत्याह।अत एवेति।लयकारणात्सुषुप्तित्वं अतएव पंचीकृतभूतकार्यस्य स्थूलप्रपंचस्य जाग्रदवस्थाविशिष्टस्यापंचीकृतभूतकार्यस्य । सूक्ष्मप्रपंचस्य स्वाप्नप्रपंचविशिष्टस्य लयस्थानमित्यपि व्यवह्रियत इत्यर्थः । समष्टिरूपाज्ञानं सप्रपंचं निरूप्येदानीं व्यष्टिभूतमज्ञानं निरूपयितुं दृष्टांतौ तावद्दर्शयति । यथा वनस्येति । यथा बहुवृक्षसमुदायस्य वनत्वेन रूपेणैकत्वव्यवहारेपि प्रत्येकविवक्षया चूतादयो बहवोपि वृक्षाः तिष्ठंतीति बहुत्वव्यवहारः । यथा वापीकूपतडागादिषु समुदायविवक्षया जलाशय इत्येकत्वव्यवहारेऽपि प्रत्येकवाप्यादिविवक्षया बहूनि जलानि तिष्ठंतीति बहुत्वव्यवहारः ॥ तथा सकलप्रपंचकारणस्याज्ञानस्य समुदायरूपेणैकत्वेपि अहंकारादिकारणीभूतानां जीवगताज्ञानानां प्रत्येकविवक्षया बहुत्वव्यवहार इत्यर्थः ॥ अस्मिन्नर्थे श्रुतिं प्रमाणयति । इंद्र इति । ननु तथाप्येकस्यैवाज्ञानस्य तदवच्छिन्नचैतन्यस्य च व्यष्टिसमष्टिता कुत इत्यत आह । अत्रेति । भेदविवक्षया व्यष्टित्वं मृद्घटादिवत् । अभेदविवक्षया च समष्टित्वं मृत्पिंडवदित्यर्थः२७॥

(भा०टी०) ईश्वरकी उपाधिस्वरूप यह अज्ञान समष्टि, प्रपञ्चब्रह्माण्डका कारण है इसी कारण इसको कारणशरीर

कहतेहैं । आनन्दके आधिक्य होनेसे और कोषकी तरह आच्छादक होनेसे आनन्दमय कोषभी कहते हैं। यह शरीरही सम्पूर्ण इन्द्रियोंके उपरामका स्थान होनेसे सुषुप्ति कहाताहै इसी कारण इसको स्थूल और सूक्ष्म प्रपञ्चका लयस्थान कहतेहैं । जिस तरह बनके वृक्ष सबको अलग अलगग्रहण करनेसे उसको अनेक वृक्षोंद्वारा व्यवहार किया जाताहै इसी प्रकार जलाशयके जल व्यष्टिभावसे अनेक जल प्रतीत होयहैं इसी प्रकार नानाप्रकारके विराजमान जीवसमूहके अज्ञानको व्यष्टिरूपसे अनेक व्यवहार करैं हैं । श्रुतिने भी कहाहै—"ईश्वर नानाप्रकारकी मायाओंके द्वारा नानारूप धारण करताहै।" इस स्थलमें ईश्वरको प्रत्येक जीव व्यापी होनेसे व्यष्टि और समस्त जीवव्यापी होनेसे समष्टिरूप जनना॥ २७॥

इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्वप्रधाना एतदुपहितचैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञइत्युच्यते एकाज्ञानावभासकत्वादस्य प्राज्ञत्वं अस्पष्टोपाधितयाऽनतिप्रकाशकत्वम्- ॥ २८ ॥

(सं०टी०)तत्र महाप्रलयकालीनसमष्ट्युपाधिभूतविशुद्धसत्वप्रधानाया मूलप्रकृतेः सकाशात् दैनंदिनप्रलयकालीनव्यष्ट्युपाधिभूतजीवप्रकृतेर्भेदं दर्शयति। इयं व्यष्टिरिति। इयं जीवगताज्ञानसुषुप्त्यवस्थापन्नाहंकारादिविक्षेपसंस्कारादिरूपा निकृष्टोपाधित्वेन मलिनसत्वप्रधानेत्यर्थः।अनेनोपाधिनाप्राज्ञचैतन्यं लक्षयति। एतदुपहितमिति । अत्रोपपत्तिमाह एके-

ति। ईश्वरगतमूलाज्ञानस्य जीवगताहंकारादिविक्षेपसंस्कारादि-रूपाज्ञानस्य वस्तुत एकत्वेन तदवभासकेश्वरजीवचैतन्ययोर-प्येकत्वमित्यर्थः ॥ २८ ॥

(भा०टी०) उक्त अज्ञानकी व्यष्टि अपकृष्ट उपाधि है इसीसे अज्ञानकी व्यष्टिसे तमोगुणमिश्रित सत्वगुण प्रधान है। इसी व्यष्टिभूत अज्ञानसे उपहित चैतन्य प्राज्ञशब्दसे कहा जाता है इसी व्यष्टिभूत अज्ञानोपहित चैतन्यमें अल्पज्ञत्व और अनीश्वरत्व आदि गुण रहते हैं। इसी कारण व्यष्टिभूत अज्ञानोपहित चैतन्य अलग अलग एक एक अज्ञानका प्रकाशक है इसी कारण इसको प्राज्ञ, और मलिनसत्त्वप्रधान, अस्पष्ट उपाधिसे उपहित होनेसे अनतिप्रकाशक (अल्पप्रकाशक) कहते हैं ॥ २८ ॥

अस्यापीयमहङ्कारादिकारणत्वात्कारण-
शरीरम् आनन्दप्रचुरत्वात्कोशवदाच्छा-
दकत्वाच्च--आनन्दमयःकोशः। सर्वोपर-
मत्वात्सुषुप्तिः। अत एव स्थूलसूक्ष्मश-
रीरलयस्थानमिति चोच्यते ॥ २९ ॥

(सं०टी०) सौषुप्तजीवचैतन्यस्य प्राज्ञत्वं साधयति। अस्येति। संस्काररूपास्पष्टोपाधितया तदावृतत्वेनातिप्र-काशकत्वाभावात्प्राज्ञत्वमस्येत्यर्थः। यथा जगत्कारणेश्वरोपा-धेःकारणशरीरत्वेनानंदप्रचुरत्वेन चानंदमयत्वं कोशदृष्टांतेन च कोशत्वं तथैतत्सर्वं तारतम्येन प्राज्ञचैतन्येप्यतिदिशति। अहं-

कारादीति।प्रलयकाले हिरण्यगर्भादिप्रपंचोत्पादकेश्वरगतमूल-
प्रकृतिवत्सुषुप्तिकालेअहंकारादिशरीरोत्पादकसंस्कारमात्राव-
शिष्टजीवगताज्ञानस्यापिकारणशरीरत्वंइंद्रियतद्विषयाभावेन-
व्यासंगाभावादानंदबाहुल्यादानंदमयत्वंकोशवदात्माच्छादक-
त्वात्कोशत्वंचयुक्तमितिभावः॥ ननुस्थूलसूक्ष्मशरीरलयस्थान
स्यकथं सुषुप्तिशब्दवाच्यत्वमित्याशंक्यपूर्ववत्संज्ञाभेदो नव-
स्तुभेदइतिवक्तुंतत्रयुक्तिमाह।सर्वोपरमत्वादिति।पंचीकृतस्थूल-
शरीरस्य व्यावहारिकस्यापंचीकृतसूक्ष्मशरीरे प्रातिभासिके
प्रविलापितत्वात्तस्यापि प्रातिभासिकस्य स्वाप्नप्रपंचस्य स्व-
कारणेऽज्ञाने लीनत्वात्सर्वोपरतिरित्यर्थः । तथा चोक्तम् "लये
फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरंगके । तस्यापि विलये नीरे
तिष्ठंत्येव यथा पुरा । व्यावहारिकजीवस्य लयःस्यात्प्रातिभा-
सिके । तल्लये सच्चिदानंदाः पर्यवस्यंति साक्षिणि" इति ॥ २९॥

(भा०टी०) यही व्यष्टिभूत ज्ञान अहंकारादिका कारण
है इसी कारण इसको कारणशरीर कहते हैं आनन्दका आ-
धिक्य होनेसे तथा कोषकी तरह आच्छादक होनेसे आन-
न्दमयकोष, और इन्द्रियोंका उपरमस्थान होनेसे सुषुप्ति
कहाजाताहै । इसी कारण इसी अज्ञानको स्थूल सूक्ष्म प्र-
पञ्चका लयस्थान कहते हैं ॥ २९ ॥

तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसू-
क्ष्माभिरज्ञानवृत्तिभिरानन्दमनुभवतः । "आनन्द-
भुक् चेतोमुखः प्राज्ञः" इति श्रुतेः । 'सुखमहमस्वा-

प्सं न किञ्चिदवेदिषम्' इत्युत्थितस्य परामर्शोप-त्तेश्च॥ ३०॥

(सं॰टी॰) ननु प्रलयकाले सुषुप्तिकाले चांतःकरणवृत्त्यभावेनानंदग्राहकाभावादानंदप्राचुर्यसद्भावे प्रमाणाभावमाशंक्य परिहरति। तदानीमिति। यथा सूक्ष्मत्वेनान्तःकरणस्य वृत्तिरंगीक्रियते तथाचैतन्यप्रदीप्त्याज्ञानस्यापिसूक्ष्मावृत्तयःस्वीक्रियंते तथा चेश्वरःस्वकीयाज्ञानवृत्तिभिःस्वात्मानंदबाहुल्यमनुभवति जीवोपि संस्कारमात्राविशिष्टातिशयाज्ञानवृत्तिभिः स्वात्मानंदबाहुल्यं तारतम्येनानुभवतीति भावः। अत्रैवोपष्टंभकत्वे श्रुतिमवतारयति। आनंदभुगिति। अस्यार्थः आनंदो विक्षेपाभावोपलक्षित आत्मानमेव भुंक्तेऽज्ञानवृत्तिभिरवगच्छतीत्यानंदभुक् चेत आत्मस्वरूपावबोधःसएवावरणशक्तिसहितो मुखं यस्य स चेतोमुखः प्राज्ञः प्रकृष्टे स्वयंप्रकाश आनंदात्मनि अज्ञानावृत्तिरूपो बोधो यस्य स प्राज्ञः उक्तावस्थाद्वयाभावेनावगम्यमानत्वात्तृतीयः उत्तरकालीनसुखपरामर्शोपपत्तिरपिपूर्वानुभूतसुखबाहुल्यानुभवसद्भावे प्रमाणमित्याह सुखमहमिति। सुखमहमस्वाप्समित्यानंदपरामर्शः न किञ्चिदवेदिषमित्यज्ञानपरामर्षः। तथाच सुषुप्तिदशायां प्रलयकाले च प्राज्ञेश्वरावज्ञानवृत्तिभिरानंदमनुभवत एवेत्यर्थः॥ ३०॥

(भा॰टी॰) ईश्वर और प्राज्ञ दोनों सुषुप्तिकालमें चैतन्यद्वारा प्रकाशित होकर अतिसूक्ष्म अज्ञानवृत्तिके द्वारा आनन्द भोगते हैं। इस विषयमें श्रुति प्रमाण है—"प्राज्ञ चैत-

न्यके प्रकाशद्वारा सुखको भोगता है" स्मरणकेप्रमाणसेभी जा-
ना जाता है क्योंकि जब पुरुष शयन करके उठता है तब
ऐसा कहता है कि 'आजमें जिस समय सुखकी निद्रामें सो
रहा था तब मुझको कुछ खबर नहीं थी' ॥ ३० ॥

अनयोर्व्यष्टिसमष्टयोर्वनवृक्षयोरिव ज-
लाशयजलयोरिव चाभेदः ॥ ३१ ॥

(सं॰टी॰) तदानीमीश्वरगतमूलाज्ञानस्यजीवगतसंस्कारमा
त्रावशिष्टाज्ञानस्य च समष्टिव्यष्टयभिप्रायेण भेदभानेपि वस्तुतो
भेदो नास्तीत्येतत्सदृष्टांतमाह । अनयोरिति ॥ ३१ ॥

(भा॰टी॰) जिस प्रकार वृक्षकी समष्टि सहित वनका
और वनकी व्यष्टिसहित वृक्षका कुछ भेद नहीं है, और
जैसे जलकी समष्टिसहित जलाशयका और जलाशयकी
व्यष्टि सहित जलका कोई भेद नहीं है तिसी प्रकार अज्ञान
समष्टिसहित अज्ञानव्यष्टिकाभी कोई भेद नहीं है ॥ ३१ ॥

एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्ना-
काशयोरिव जलाशयजलगतप्रतिबिम्बाकाशयो-
रिव चाभेदः। "एष सर्वेश्वर एष सर्वज्ञ एषोन्तर्या-
म्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्"
इत्यादिश्रुतेः ॥ ३२ ॥

(सं॰टी॰) उक्तोपाधिद्वारेणेश्वरप्राज्ञयोरप्यभेदं दृष्टांत-
मुखेन दर्शयति । एतदुपहितयोरिति । ईश्वरस्य वनावच्छि-
न्नाकाशवत्प्राज्ञस्य वृक्षावच्छिन्नाकाशवच्च तथा स्थूलजलाश-

योपाध्यवच्छिन्नाकाशवत् जलगतप्रतिबिंबाकाशवच्चकारणो पाध्यवच्छिन्नेश्वरस्य कार्योपाध्यवच्छिन्नप्राज्ञस्य च वस्तुतोऽभेद एवेत्यर्थः।तत्र प्रमाणमाह।एष इति। तथा चोक्तमाचार्यैः। "कार्योपाधिरयं जीवःकारणोपाधिरीश्वरःकार्यकारणतांहित्वा पूर्णबोधोऽवशिष्यते" इति ॥ ३२ ॥

(भा०टी०) जिसप्रकार वृक्षोंके समष्टिरूप वनमें अवस्थित आकाश सहित वनका और व्यष्टिरूप प्रत्येक वृक्षमें अवस्थित आकाशका कोई भेद प्रतीत नहीं होता है तथा जलके समष्टिरूप जलाशयमें प्रतिबिम्बित आकाशसहित जलाशयका और व्यष्टिरूप जलमें प्रतिबिम्बित आकाशका कोई भेद नहीं मालूम होता है। इसी प्रकार समष्टिरूप अज्ञान-उपाधि विशिष्टचैतन्यस्वरूप ईश्वरका और व्यष्टिरूप अज्ञानसे उपहित चैतन्यस्वरूप प्राज्ञका कोई भेद नहीं है इस विषयमें श्रुतिका भी प्रमाण है-"यही सम्पूर्णका ईश्वर, यही सर्वज्ञ, यही अन्तर्यामी, यही सम्पूर्णका कारण, यही जगत्की उत्पत्ति और प्रलयका हेतु है" ॥ ३२ ॥

वनवृक्षतदवच्छिन्नाकाशयोर्जलजलाशयतद्गतप्रतिबिम्बाकाशयोर्वा आधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते ।"शान्तंशिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा सविज्ञेयः" इत्यादि श्रुतेः ॥ ३३ ॥

(सं०टी०) उपाधिद्वयावच्छिन्नौ प्राज्ञेश्वरौ सप्रपंचं निरूप्येदानीं अनवच्छिन्नं तुर्यं चैतन्यं लक्षयति । वनेति । यथा स्थूलवनोपाध्यवच्छिन्नाकाशापेक्षया सूक्ष्मवृक्षोपाध्यवच्छिन्नाकाशापेक्षया च महाकाशस्य तदुभयाधारतयानवच्छिन्नत्वान्महाकाशत्वं तथा कार्यकारणोपाधितदवच्छिन्नचैतन्यद्वयापेक्षया तदाधारभूतयदनवच्छिन्नं सर्वव्यापिचैतन्यं विशुद्धं तत्तुरीयमुच्यत इत्यर्थः।अस्य चैतन्यस्य तुरीयत्वंवक्ष्यमाणविश्वाद्यपेक्षयेति द्रष्टव्यं।अस्मिन्नर्थे श्रुतिं संवादयति।शान्तं शिवमिति।आदिपदात् "त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्चयद्भवेत् तेभ्योविलक्षणः साक्षीचिन्मात्रोहंसदाशिवः" इत्यादिश्रुत्यंतरग्रहः ॥ ३३ ॥

(भा०टी०) जैसे वन और वनमें स्थित आकाश, वृक्ष और वृक्षमें स्थित आकाश, जलाशय जलाशयप्रतिबिम्बित-आकाश और जलप्रतिबिम्बित आकाशका आश्रय जो अपरिच्छिन्न आकाश उसको महाकाश कहते हैं। तिसीप्रकारसमष्टि और व्यष्टिभूत अज्ञान औरअज्ञानोपहित चैतन्यादिका आधार जो अपरिच्छिन्न चैतन्य उसको तुरीय ब्रह्मचैतन्य कहतेहैं । इसमें श्रुतिका भी प्रमाण है—"मङ्गलमय अद्वितीय चैतन्यको चतुर्थ (तुरीय) कहते हैं और उसीको आत्मा और विज्ञेय भी कहते हैं" ॥ ३३ ॥

इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैत-

न्याभ्यां तप्तायःपिण्डवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमित्युच्यते ॥ ३४ ॥

(सं०टी०) एतदेव विशुद्धचैतन्यं पूर्वोक्तं चैतन्यद्वयेन सहैकत्वविवक्षायां महावाक्यस्य वाच्यत्वं लभतेऽभेदविवक्षायां च लक्ष्यत्वं च लभत इत्याह। इदमिति । त्रयाणां चैतन्यानां चैतन्येन रूपेणैकत्वेपि अवच्छिन्नानवच्छिन्नत्वेन रूपेण वाच्यलक्ष्यत्वे संभवत इति भावः ॥ ३४ ॥

(भा०टी०) जैसे अग्निसे तपाये हुए लोहेके सहित अभिन्नरूप होनेसे "लोहा जलाता है"। इसप्रकार वाक्यका प्रयोग होता है किन्तु यही अग्निही अभिन्नरूप उक्त वाक्यका वाच्य और लोहेसे भिन्नरूप इस वाक्यका लक्ष्य होताहै तिसी प्रकार यह तुरीय ब्रह्मचैतन्य समष्टिव्यष्टिअज्ञान और अज्ञानोपहित चैतन्यके सहित अभिन्नरूप होनेसे (तत्त्वमसि) इस महावाक्यका वाच्य और भिन्नरूप उसका लक्ष्य होता है

अस्याज्ञानस्यावरणविक्षेपनामकं शक्तिद्वयमस्ति। आवरणशक्तिस्तावत्-अल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाऽज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशसामर्थ्यम्। तदुक्तम्-"घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथानिष्प्रभं

मन्यते चातिमूढः। तथा बद्धवद्भाति यो मूढदृष्टेः सनित्योपलब्धिस्वरूपोहमात्मा ॥ ३५ ॥

(सं०टी०)अथेदानीं स्वप्रकाशचिद्रूपस्यात्मनः कथं कुंठितप्रकाशत्वं कथं चासंगोदासीनस्यात्मन आकाशादिप्रपंचजनकत्वमित्येतन्महाविरोधपरिहारायाज्ञानस्यशक्तिद्वयं निरूप्यते।अस्येति।ते एव नामतो निर्दिशति।आवरणविक्षेपनामकमिति।आवरणशक्तिस्तावत् सच्चिदानंदस्वरूपमावृणोतीत्यावरण-शक्तिःब्रह्मादिस्थावरांतं जगज्जलबुद्बुदवन्नामरूपात्मकं विक्षि-पति सृजतीति विक्षेपशक्तिरिति शक्तिद्वयमज्ञानस्येत्यर्थः।न-न्वपरिच्छिन्नस्यस्वप्रकाशचिद्रूपाखंडपरिपूर्णस्वरूपस्यात्मनप रिच्छिन्नेनानित्येनजडतमोरूपेणाव्यापकेनाज्ञानशक्तिविशेषेण कथमावरणमित्याशंक्य वस्तुतोऽज्ञानस्यात्माच्छादकत्वाभा-वेपि प्रमातृबुद्धिमात्रावच्छादकत्वेनाज्ञानस्यात्माच्छादकत्व-मुपचारादुच्यत इत्याह । आवरणशक्तिरिति । यथाऽत्य-ल्पोपि मेघोऽनेकयोजनविस्तीर्णमादित्यमंडलमवलोकयितृपु-रुषदृष्टिमात्राच्छादकत्वेनादित्यमाच्छादयतीत्युपचारादुच्यते तथा अतितुच्छपरिच्छिन्नमप्यज्ञानं अपरिच्छिन्नमात्मानंदघनं प्रमातृबुद्धिमात्राच्छादकत्वेनात्मानमाच्छादयतीत्युपचारादु-च्यते इत्यर्थः।अस्मिन्नर्थे वृद्धसंमतिमाह।तदुक्तमिति॥ ३५॥

(भा०टी०) पूर्वोक्त अज्ञानकी दो शक्ति हैं जैसे आ-वरण शक्ति औरविक्षेपशक्ति । पहले आवरणशक्ति दिख-लाते हैं । जैसे मनुष्योंके नयनोंका आवरण करनेवाला

ल्पस्थानमें रहनेवाला मेघमण्डल सहस्रों योजन विस्तीर्ण सूर्य्यका आच्छादक कहाजाताहै तिसीप्रकार अविवेकी मनुष्यके ज्ञानका आवरण करनेवाला तथा सर्वव्यापी परब्रह्मका आच्छादक रूप प्रसिद्ध अज्ञानकी शक्तिको आवरणशक्ति कहतेहैं। हस्तामलकमें लिखाभी है-"जैसे अज्ञानी पुरुषके नेत्र मेघसे आच्छादित होजातेहैं तब कहैहैं कि सूर्य्यमण्डलको मेघमण्डलने आच्छादित करदिया। तिसी प्रकार मूढ दृष्टि पुरुष जिसको बद्ध कहते हैं मैं वही नित्यज्ञान स्वरूप आत्मा हूँ" ॥ ३५ ॥

अनयावृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसारसम्भावनापिभवति यथा स्वज्ञानेनावृतायां रज्ज्वां सर्पत्वसम्भावना ॥ ३६ ॥

(सं०टी०) अनयैवावरणशक्त्यावच्छिन्नस्यात्मनःकर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकत्वतुच्छसंसारसंभावनापि संभाव्यत इत्याह। अनयेति। इयमेवावरणशक्तिरात्मनो भेदबुद्धिजनकत्वेन संसारहेतुरिति भावः। अत्रानुरूपं दृष्टांतमाह। यथा स्वाज्ञानेनेति ॥ ३६ ॥

(भा०टी०) जैसे भ्रमवशसे रज्जुमें रज्जुका ज्ञान नहीं होय है सर्पज्ञान उत्पन्न होजाय है तिसी प्रकार अज्ञानकी आवरण शक्तिद्वारा आच्छादित आत्माके स्वरूपका ज्ञान नहीं होय है और मैं कर्त्ता हूं भोक्ता हूं सुखी हूं दुःखी हूं इत्यादि मोहजालसे व्याप्त संसारका बोध होता है ॥ ३६ ॥

विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति, एवमज्ञानमपि स्वावृतात्मनि स्वशक्त्या आकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम्। तदुक्तम्--"विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेत्" इति ॥ ३७ ॥

(सं०टी०) यदुक्तमसंगोदासीनस्यात्मनः कथं जगत्कारणत्वमिति तन्निराकर्तुं विक्षेपशक्तिस्वरूपमाह। विक्षेपशक्तिस्त्विति । यथा रज्जुविषयकमज्ञानं सर्पमुत्पादयति तथात्मविषयकमज्ञानमपि स्वावच्छिन्ने आत्मनि विक्षेपशक्तिप्रभावेणाकाशादिकं प्रपंचमुद्भावयतीत्यर्थः। अस्मिन्नर्थे ग्रंथांतरसंमतिं दर्शयति। तदुक्तमिति । ननु किमात्मा चराचरात्मकप्रपंचस्य निमित्तकारणं उपादानकारणं वा। नाद्यः । दंडादिवत्स्वकार्यव्यापित्वं न स्यादात्मनः "तत्सृष्ट्वा तदेवानुप्राविशत्" इतिश्रुत्याकार्यव्यापित्वश्रवणात् । न द्वितीयः । अचेतनस्य जडस्य प्रपंचस्य चैतन्योपादानकत्वासंभवात् ॥ ३७ ॥

(भा०टी०) अब विक्षेपशक्तिको दिखाते हैं। जैसे रज्जुविषयक अज्ञान अपनी शक्तिद्वारा रज्जुसे सर्पका स्वरूप प्रदर्शन करैहै तिसी प्रकार यह शक्ति अज्ञानावृत आत्मामें आकाशादि पञ्चभूतका भ्रम प्रदर्शन करै है। इसीको विक्षेपशक्ति कहते हैं। ग्रन्थान्तरमें भी ऐसा लिखा है कि—"अज्ञानकी विक्षेपशक्ति ब्रह्मसे लेकर स्तम्बपर्य्यन्त जगत्को उत्पन्न करै है"

शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया

निमित्तं स्वोपाधिप्रधानतया उपादानञ्च भवति यथा लूता तन्तुकार्य्यम्प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति ॥ ३८ ॥

(सं०टी०) उपादानत्वेन च कार्यकारणयोरभेदेन प्रपंचस्यापि चैतन्यरूपत्वप्रसंगादनित्यत्वं न स्यादित्याशंक्य जडप्रपंचं प्रत्यात्मनः चैतन्यप्राधान्येन निमित्तत्वं स्वाज्ञानप्राधान्येनोपादानत्वं च संभवतीत्याह । शक्तिद्वयवदिति ।यथायस्कांतसन्निधाने जडमयं लोहं चेष्टते तथा चैतन्यसन्निधाने जडमज्ञानं चेष्टते इत्यज्ञानविकारं प्रति चैतन्यस्य निमित्तत्वं जडाकाशादिकार्यं प्रति मायायाः साक्षादुपादानत्वेन मायाविन ईश्वरस्यापि परंपरयोपचारादुपादानत्वं न विरुध्यत इत्यर्थः।तदुक्तं चैतन्यस्य निमित्तकारणत्वे कार्यानुप्रवेशो न स्यादिति।तन्न । कारणस्य कार्यानुप्रवेशनियमस्योपादानकारणविषयत्वेननिमित्तकारणविषयत्वाभावात् 'तत्सृष्ट्वा' इत्यादिश्रुतेरप्युपादानकारणपरत्वात्।यदप्युक्तं आत्मन उपादानकारणत्वे प्रपंचस्यानित्यत्वं न स्यादिति तदपि न । तस्य परिणामविषयत्वेन विवर्त्तविषयत्वाभावात्प्रपंचस्य ब्रह्मविवर्तत्वाद्विवर्तत्वं च स्वस्वरूपापरित्यागेन स्वरूपांतरप्रदर्शकत्वं।यथा रज्ज्ववच्छिन्नचैतन्यनिष्ठाज्ञानस्यरज्जुस्वरूपापरित्यागेन सर्पादिस्वरूपांतरप्रदर्शकत्वं तथेश्वरचैतन्यनिष्ठाज्ञानशक्तेरपि चैतन्यस्वस्वरूपापरित्यागेन आकाशादिस्वरूपांतराकारेण प्रदर्शकत्वं।एतावताकाशादिप्रपंचस्य नित्यत्वं न संभवति।अज्ञानस्यमिथ्यारूपत्वेन त-

ज्जन्याकाशादिप्रपंचस्यापि मिथ्यात्वं।न चैवमज्ञानस्य मिथ्यात्वे तत्प्रयुक्तबंधमोक्षयोरपिमिथ्यात्वप्रसंग इति वाच्यं।इष्टापत्तेः तदुक्तं भगवता "बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः। गुणस्य मायामूलत्वान्न मे मोक्षो न बंधनम्" इति।अलमतिविस्तरेण ।एकस्यैवात्मनो निमित्तोपादानकारणत्वे दृष्टांतमाह ।यथा लूतातंत्विति ।यथा लूतातंतुः स्वोत्पद्यमानतंतुलक्षणं कार्यं प्रति स्वचैतन्यप्रधानतयानिमित्तं चैतन्यसंनिधानव्यतिरेकेण जडस्य देहस्य मृतशरीरवत्तंतुजनकत्वासंभवात्स्वशरीरप्रधान्येनोपादानं च भवति। अशरीरस्य साक्षात्तंतुजनकत्वासंभवात्स्वशरीरप्राधान्येनोपादानं च भवति । शरीरस्य साक्षात्तंतूपादानत्वेन तदवच्छिन्नचैतन्यस्याप्युपादानत्वेनोपचारात् ॥ ३८ ॥

(भा०टी) जैसे ऊर्णनाभकीट (मकड़ी) स्वकृत प्रधानरूपसेजालेका निमित्त कारण और शरीरप्रधानरूपस तिसी तन्तुका उपादान कारण होता है । तिसी प्रकारसे आवरण और विक्षेपशक्तिविशिष्ट अज्ञानद्वारा समावृत चैतन्य स्वयं प्रधानरूपसे प्रपञ्चविश्वका निमित्त कारण और उपाधिरूप अज्ञानरूपसे उपादान कारण होता है ॥ ३८ ॥

तमः प्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुर्वायोरग्निरग्नेरापःअद्भ्यःपृथिवी चोत्पद्यते।"तस्माद्वाएतस्मादात्मन आकाशः सम्भूतः" इत्यादिश्रुतेः ॥ ३९ ॥

(सं०टी०) एवमीश्वरस्यापि स्वचैतन्यप्रधानतया निमि-

त्तत्वं स्वोपाधिप्रधानतयोपादानत्वं चभवतीत्यर्थः।इदानीं विक्षे. पशक्तिकृत्यमाह। तमइति ।आकाशादेर्जडत्वात्तमोगुणप्रधा- नविक्षेपशक्तियुक्ताज्ञानावच्छिन्नचैतन्यस्यै वाकाशादिप्रपंचज नकत्वमिति भावः।अस्मिन्नर्थे श्रुतिं प्रमाणयति।"तस्माद्वा एत- स्मादात्मनआकाशःसंभूतः"इति।एतेनापिसांख्यनैयायिकपक्षौ निरस्तौ । शक्तेरज्ञानस्य शक्तिमत्परतंत्रत्वात्स्वतन्त्रस्य तस्य केवलस्य जडस्याज्ञानस्य जगत्कारणत्वानुपपत्तेः । "ईक्षतेर्ना- शब्दम्।रचनानुपपत्तेश्चनानुमानम्"इत्यादिन्यायनिरस्तत्वाच्च। परमाणोरप्युक्तदोषग्रासत्रासानपायात् । अभिन्ननिमित्तो- पादानप्रतिपादकश्रुतिस्मृतिन्यायविरोधाच्च। "यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रत्यधिसंविशंति । सदेव सौम्येदमग्र आसीत्।एतस्माज्जायते प्राणो मनःसर्वेंद्रियाणिच । अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते। बीजं मां सर्वभूतानाम्" इत्यादिश्रुतिस्मृतिभिरीश्वरस्यैवजगत्कारणत्वप्रतिपादनात् ३९

(भा०टी०)तमोगुणप्रधानविक्षेपशक्तिविशिष्टअज्ञानसे आच्छादित चैतन्यसे आकाश उत्पन्न हुआ है आकाशसे वायु वायुसे अग्नि अग्निसे जल जलसे पृथिवी उत्पन्न हुई है इसी प्रकार क्रमसे प्रपञ्चविश्व उत्पन्न हुआहै श्रुतिमें भी ऐसाही लिखा है ॥ ३९ ॥

तेषु जाड्याधिकदर्शनात्तमःप्राधान्यं तत्कारण- स्य तदानीं सत्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते। इमान्येव सूक्ष्मभूतानि

तन्मात्राण्यपंचीकृतानि चोच्यन्ते । एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते ॥४०॥

(सं०टी०) नन्वाकाशादिप्रपंचोत्पादकचैतन्यावच्छेदकाज्ञाने कुतः तमःप्राधान्यमित्याशंक्याह । तेष्विति । कारणगुणा हि कार्यगुणानारभंत इति न्यायादिति भावः।ननु त्रिगुणात्मकत्वादज्ञानस्य कथं तमोगुणमात्रप्राधान्येनाकाशादिजनकत्वमित्याशंक्याह।तदानीमिति।तदानीमुत्पत्तिवेलायांसत्वादयः त्रयोपि गुणाः तारतम्येन कारणप्रक्रमन्यायेन तेष्वाकाशादिषु पंचभूतेषूत्तरोत्तराधिक्येन जायंत इत्यर्थः । इमान्येव सूक्ष्मशरीरादिकारणभूतान्यपंचीकृतानि सूक्ष्मरूपतन्मात्राणीत्युच्यंत इत्याह।एतान्येवेति।"पंचप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् अपंचीकृतभूतोत्थंसूक्ष्मांगं भोगसाधनम्"इति वचनादप्यपंचीकृतभूतेभ्यो पंचीकृतसूक्ष्मशरीराणि पंचीकृतस्थूलभूतानि चोत्पद्यंत इत्याह । एतेभ्य इति ॥ ४० ॥

(भा०टी०) उन उत्पन्न आकाशादिमें जड़ताका आधिक्य होनेसे उनका कारण तमोगुण प्रधान मालूम होता है उन आकाशादिकी उत्पत्तिके अनन्तर उनके कारण गुणोंके तारतम्यके अनुसार सत्त्वगुण रजोगुण और तमोगुण इनकी उत्पत्ति होती है। एवं पूर्वोक्त अवस्थाको प्राप्त हुए आकाशादिक सूक्ष्मभूत, महाभूत, पञ्चतन्मात्रा और अपञ्चीकृत कहे जाते हैं इन्हीं सूक्ष्मभूतसे सूक्ष्मशरीर और स्थूलशरीर-उत्पन्न होते हैं ॥ ४० ॥

सूक्ष्मशरीराणि सप्तदशावयवानि लिंग-
शरीराणि।अवयवास्तु ज्ञानेन्द्रियपंचकं-
बुद्धिमनसी कर्मेन्द्रियपंचकं वायुपंचकं-
चेति।ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्या-
नि। एतान्याकाशादीनांसात्विकांशेभ्यो व्यस्तेभ्यः
पृथक्क्रमेणोत्पद्यन्ते।बुद्धिर्नाम निश्चयात्मिकान्तः
करणवृत्तिः ।मनो नाम संकल्पविकल्पात्मिकान्तः
करणवृत्तिः ॥ ४१ ॥

(सं०टी०) सूक्ष्मशरीरस्वरूपभूतानवयवानाह। अवय
वास्त्विति । ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वघ्राणाख्यानि।
सात्विकांशादाकाशाच्छ्रोत्रमुत्पद्यते ।सात्विकांशाद्वायोःत्वगिं
द्रियम्।सात्विकांशात्तेजसःचक्षुः।सात्विकांशाज्जलाज्जिह्वा।सा
त्विकांशायाः पृथिव्याः सकाशात् घ्राणेंद्रियं चेति।क्रमेणोत्प-
द्यंत इत्याह। एतानीति । बुद्धेर्लक्षणमाह ।बुद्धिरिति।ब्रह्मैवाह-
मिति निश्चयात्मिकैवान्तःकरणवृत्तिरेव बुद्धिरित्यर्थः। मनसो
लक्षणमाह । मनोनामेति । अहं चिद्रूपो देहो वेति संशया-
त्मिकांतःकरणवृत्तिरेव मन इत्यर्थः ॥ ४१ ॥

(भा०टी०) सूक्ष्मशरीर दिखलाते हैं । सप्तदश १७
अवयवयुक्त लिङ्गशरीरको सूक्ष्मशरीर कहते हैं । पञ्च ज्ञाने-
न्द्रिय पञ्च कर्म्मेंद्रिय पञ्चवायु मन और बुद्धि यह सप्तदश-
१७ अवयव कहलाते हैं नेत्र कर्ण नासिका जिह्वा और
त्वचा यह पांच अवयवही पञ्चज्ञानेन्द्रिय कहाते हैं यह ज्ञा-

नेन्द्रिय आकाशादिके सात्विक अंशसे उत्पन्न होती हैं । तेजके सात्विक अंशसे नेत्र अकाशके सात्विक अंशसे कर्ण पृथ्वकि सात्विक अंशसे नासिका जलके सात्विक अंशसे जिह्वा वायुके सात्विक अंशसे त्वचा उत्पन्न होते हैं । निश्चयात्मक अन्तःकरणकी वृत्तिका नाम बुद्धि है । संकल्पविकल्पात्मक अन्तःकरणकी वृत्तिका नाम मन है ॥ ४१ ॥

अनयोरेव चित्ताहंकारयोरन्तर्भावः । अनुसन्धानात्मिकान्तःकरणवृत्तिश्चित्तम् । अभिमानात्मिकान्तःकरणवृत्तिरहंकारः । एते पुनराकाशादिगतसात्विकांशेभ्योमिलितेभ्य उत्पद्येते । एतेषां प्रकाशात्मकत्वात्सात्विकांशकार्य्यत्वम् ॥ ४२ ॥

(सं०टी०)स्मरणात्मकचित्तस्य गर्वात्मकाहंकारस्य च बुद्धिमनसोरंतर्भाव इत्याह । अनयोरेवेति । यद्यप्यंतःकरणत्वेन चतुर्णामेकत्वं तथाप्येकस्यैव पुरुषस्य पाचकः पाठक इत्यादिवृत्तिभेदाद्भेदवदेकस्याप्यंतःकरणस्य निश्चयसंशय स्मरणाहंकारविषयभेदैर्बुद्ध्यादिभेदइत्यर्थः । बुद्ध्यादीनामुत्पत्तिप्रकारं दर्शयति । एते पुनरिति । एतेषां चतुर्णां सात्विकांशेभ्यो भूतेभ्य उत्पत्तौ निमित्तमाह । एतेषामिति । बुद्ध्यादीनां प्रकाशात्मकत्वात्सात्विकांशभूतकार्यत्वमित्यर्थः ॥ ४२ ॥

(भा०टी०)चित्त और अहंकार यह दोनों बुद्धि और मनके अन्तर्गत दो प्रकारकी वृत्ति हैं । अनुसन्धानात्मक अन्तःकरणकी वृत्तिका नाम चित्त है । और अभिमानसहित जो

चित्तकी वृत्ति है उसका नाम अहंकार है । बुद्धि और मन यह दोनों मिलकर आकाशादि पञ्चभूतके सात्विक अंशसे उत्पन्न होते हैं । पञ्चज्ञानेन्द्रिय बुद्धि और मन यह सब स्वप्रकाशक स्वभाव हैं।इसी कारण इनका पञ्चभूतके सात्विक अंशसे उत्पन्न होना अनुमान किया जाता है ॥ ४२ ॥

इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता सती विज्ञानमयकोशोभवति। अयं कर्तृत्वभोक्तृत्वाभिमानित्वेन इहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते ॥ ४३ ॥

(सं०टी०) बुद्धेर्विज्ञानमयकोशत्वं दर्शयति। इयमिति। बुद्धेः सत्त्वकार्यत्वाज्ज्ञानेंद्रियसाहित्येन प्रकाशाधिक्याद्विज्ञानमयत्वं आत्माच्छादकत्वाच्च कोशत्वमित्यर्थः।विशुद्धबुद्धिप्रतिबिंबितचिदात्मनो जीवत्वं दर्शयति। अयमिति।तप्तायःपिंडवद्बुद्ध्यारोपितं चैतन्यं वस्तुतोऽकर्तृभोक्तृनित्यानंदापरिच्छिन्नमक्रियमपि भोक्तृत्वकर्तृत्वसुखित्वदुःखित्वपरिच्छिन्नत्वक्रियावत्त्वाद्यभिमानेन स्वर्गादिलोकांतरगामित्वं व्यावहारिकजीवत्वं च लभत इत्यर्थः ॥ ४३ ॥

(भा०टी०) सम्पूर्ण ज्ञानेन्द्रियोंके सहित मिलकर बुद्धिको विज्ञानमयकोष कहते हैं। यही विज्ञानमयकोष मैं कर्त्ताहूं मैं भोक्ता हूं मैं सुखी हूं मैं दुःखी हूं इत्यादि अभिमानयुक्त इसलोकमें रहनेवाला और परलोकमें जानेवाला, इसप्रकार व्यवहारसे इसको जीवकहते हैं ॥ ४३ ॥

मनस्तु कर्म्मेन्द्रियैः सहितं सन्मनोमयकोशो भवति । कर्म्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि । एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक्क्रमेणोत्पद्यन्ते ॥ ४४ ॥

(सं०टी०) मनोमयकोशत्वं निरूपयति।मनस्त्विति। सत्वगुणप्रधानं मनःसत्त्वगुणांशेभ्यो जातैः श्रोत्रादिज्ञानेंद्रियैरेव सहितं सन्मनोमयकोश इत्यर्थः।अत्र तु मनसः सत्त्वोपहितरजोविकारेच्छारूपत्वात्संकल्पविकल्पात्मकत्वेन बुद्ध्यपेक्षया जाड्याधिक्यात् मनोमयत्वं आत्माच्छादकत्वात्कोशत्वमिति भावः । कर्मेंद्रियाण्युपदिशति।कर्मेंद्रियाणीति-एतेषामुत्पत्तौ साधनापेक्षायामाह।एतानि पुनरिति।भूतानां त्रिगुणत्वेपि रजोगुणबहुलेभ्यो व्यस्तभूतेभ्यो वागादीनि पृथक्पृथक् क्रमेणोत्पद्यंते।भूतानां त्रिगुणत्वेपि रजोगुणप्रधानादाकाशात् वागिन्द्रियमुत्पद्यते रजोगुणप्रधानाद्वायोः पाणींद्रियं रजोगुणप्रधानादग्नेः पादेंद्रियं रजोगुणप्रधानाज्जलात् शिश्नेंद्रियं रजोगुणप्रधानायाः पृथिव्याः पाय्विंद्रियमुत्पद्यत इत्यर्थः ।

(भा०टी०)पाँच कर्म्मेन्द्रियोंके सहितमिलकर मनोमयकोष कहाता है वाक् पाणि पाद पायु और उपस्थ इन पाँच अवयवोंका नाम कर्म्मेन्द्रिय है यही पांच कर्म्मेन्द्रिय आकाशादि पञ्चमहाभूतोंके राजस अंशसे उत्पन्न होती हैं। आकाशके रजोभागसे वाक्य वायुकेरजोभागसे पाणि जलके रजोभागसे पाद तेजके रजोभागसे पायु पृथ्वीके रजोभागसे उपस्थ उत्पन्न होते हैं ॥ ४४ ॥

वायवः प्रणापानव्यानोदानसमानाः । प्राणो नाम प्राग्गमनवान् नासाग्रस्थानवर्त्ती । अपानो नाम अवाग्गमनवान् पाय्वादिस्थानवर्त्ती । व्यानो नाम विष्वग्गमनवानाखिलशरीरवर्त्ती । उदानः कण्ठस्थानीयः ऊर्द्ध्वगमनवानुत्क्रमणवायुः।समान शरीरमध्यगताशितपीतान्नादिसमीकरणकरः । समीकरणन्तु-परिपाककरणं-रसरुधिरशुक्रपुरीषादिकरणम् ॥ ४८ ॥

(सं०टी०) वायूनुद्दिशति। वायव इति । यथोद्देशं प्राणमाह । प्राणोनामेति । ऊर्द्ध्वगमनशीलो नासाग्रस्थायी वायुः प्राण इत्यर्थः । अपानस्य लक्षणमाह।अपानो नामेति । अधोगमनशीलःपाय्वादिस्थायी वायुरपान इत्यर्थः।व्यानस्य लक्षणमाह । व्यानो नामेति । सर्वनाडीगमनशीलोखिलशरीरस्थायी वायुर्व्यान इत्यर्थः । उदानस्य लक्षणमाह । उदानोनामेति ऊर्ध्वमुत्क्रमणशीलः कंठस्थायी वायुरुदान इत्यर्थः । समानस्य लक्षणमाह । समानोनामेति । शरीरमध्यगतोन्नरसादिनेता वायुः समान इत्यर्थः । प्राणादीनां वायुत्वेन रूपेणैकत्वेपि क्रियाभेदेन भेद इत्यर्थः ॥ ४५ ॥

(भा०टी०) प्राण,अपान, व्यान, उदान, और समान इनको पञ्च वायु कहते हैं । ऊपरको चलनेवाला नासिकाके अग्रभागमें रहनेवाले वायुका नाम प्राणवायु है । नीचेको चलनेवाला गुदास्थानमें रहनेवाले बायुको अपानवायु कहते हैं।

सब नाडियोंमें चलनेवाला सब शरीरमें रहनेवाले वायुको व्यान कहते हैं। ऊपरको चलनेवाला कण्ठस्थानमें रहनेवाले वायुको उदान कहते हैं। और भोजन कियेहुए अन्नके और पान कियेहुये जलादिके समीकरण करनेवाले वायुको समान वायु कहते हैं। परिपाक क्रियाद्वारा भोजनकरी हुई वस्तुका रुधिर वीर्य्य और पुरीषादि करनेका नाम समीकरण है॥ ४५॥

केचित्तु नागकूर्म्मकृकलदेवदत्तधनञ्जयाख्याः पंचान्ये वायवः सन्तीत्याहुः। तत्र नागः उद्गिरणकरः। कूर्म्मः निमीलनादिकरः कृकलः क्षुधाकरः । देवदत्तः जृम्भणकरः । धनञ्जयः पोषणकरः । एतेषां प्राणादिष्वन्तर्भावात्प्राणादयः पंचैवेति केचित् । इदं प्राणादिपंचकं आकाशादिगतरजोंशेभ्यो मिलितेभ्य उत्पद्यते ॥ ४६ ॥

(सं॰टी॰) कापिलमतानुसारिणः क्रियाभेदेनान्येऽपि पंच वायवः संतीति वदंतीत्याह । केचित्त्विति । तेषामेव नामानि निर्दिशति नागेत्यादिना । नागेति । वेदांतिनस्तु नागादीनां प्राणादिष्वंतर्भावं वदंतीत्याह। एतेषां प्राणादिष्विति । प्राणादिवायुनामुत्पत्तौ कारणापेक्षायामाह एतदिति । अपंचीकृतपंचमहाभूतेभ्यो रजःप्रधानेभ्यः प्राणादयो जायन्त इत्यर्थः।

(भा॰टी॰) सांख्यमतावलम्बी तो ऐसा कहते हैं कि नाग, कूर्म्म, कृकल, देवदत्त, धनञ्जय, यह और भी पाँच वायुहैं। उद्गिरण करानेवाले वायुको नाग कहते हैं। जिस वायुसे नेत्र

खिचजाय वह कूर्म्मवायु कहाता है। जिस वायुसे क्षुधा लगै उसको कृकल कहते हैं। जम्भा करानेवाले वायुको देवदत्त कहते हैं। जिस वायुसे पुष्टि होती है उसको धनञ्जय कहते हैं। परतु वेदान्तमतके आचार्य केवल प्राणादि पाँच वायुही मानते हैं और अलग कोई वायु नहीं मानते हैं वह प्राणादि पञ्चवायुमें नागादि वायुका अन्तर्भाव मानते हैं। यह प्राणादि पञ्च वायु मिलेहुए आकाशादि पञ्चभूतके राजसअंशसे उत्पन्न होते हैं ॥ ४६ ॥

इदं प्राणादिपंचकं कर्म्मेन्द्रियसहितं सत् प्राणमयकोशो भवति। अस्य क्रियात्मकत्वेन रजोंशकार्य्यत्वम्। एतेषु कोशेषुमध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः। मनोमयः—इच्छाशक्तिमान् करणरूपः।प्राणमयःक्रियाशक्तिमान् कार्य्यरूपः।योग्यत्वादेवमेतेषां विभागः—इति वर्णयन्ति। एतत्कोशत्रयं मिलितं सत् सूक्ष्मशरीरमित्युच्यते॥४७॥

(सं०टी०) एतेषां प्राणादीनां प्राणप्रचुरत्वात्प्राणमयत्वं आत्माच्छादकत्वात्कोशत्वं च भवतीत्याह। इदमिति। प्राणादीनां रजःप्रधानभूतकार्यत्वे निमित्तमाह। अस्येति। प्राणादीनां क्रियात्मकत्वाद्रजःकार्यमित्यर्थः।एतेषु पंचसु कोशेषु मध्ये विज्ञानमयमनोमयप्राणमयकोशानां क्रमेण ज्ञानेच्छाक्रियाशक्तिभेदेन कर्तृकरणक्रियारूपत्वं दर्शयति।एतेष्विति।तत्र हेतुमाह। योग्यत्वादिति। इदमेव कोशत्रयं सूक्ष्मशरीरमिति व्यवह्रियत इत्याह। एतदिति ॥ ४७ ॥

(भा०टी०) पूर्व कहेहुए प्राणादि पञ्चवायु और कर्म्मेन्द्रियोंका मिलकर प्राणमय कोश होता है गमन आगमन इत्यादि क्रिया प्राणादि पञ्चवायुका स्वभाव है इसी कारण यह पञ्चवायु सम्पूर्ण राजसअंशका कार्य्य मालूम होता है । पूर्व कहेहुए कोशोंके मध्यमेंज्ञानशक्तियुक्त विज्ञानमय कोश कर्त्ता है । इच्छाशक्तियुक्त मनोमयकोश करण है । क्रियाशक्तियुक्त प्राणमय कोश कार्य्य है इसप्रकार तीनों कोशोंका विभाग वर्णन करते हैं । यही तीनों कोश मिलकर कोशसमष्टिका सूक्ष्मशरीर कहलाता है ॥ ४७ ॥

अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः । अनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिश्च भवति । एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राण—इति चोच्यते सर्वानुस्यूतत्वात् । ज्ञानेच्छाक्रियाशक्तिमदपंचीकृतपंचमहाभूताभिमानित्वाच्च ॥ ४८ ॥

(सं०टी०) अस्य समष्टित्वे हेतुमाह । अत्रापीति । एकबुद्ध्येति । चराचरप्राणिमात्रस्य यावंत्यनंतानि सूक्ष्मशरीराणि तेषां सर्वेषां सूक्ष्मशरीराणां सूत्रात्मनाहिरण्यगर्भाख्येन स्वीयैकबुद्ध्या विषयीकृतत्वात्समष्टित्वमित्यर्थः । तत्र दृष्टांतमाह । वनवदित्यादि । अस्यैव सूक्ष्मशरीरस्य व्यष्टित्वं दर्शयति । अनेकेति । अनेकेषां जीवानां प्रत्येकं स्वस्व-

लिंगशरीरस्य स्वबुद्धिविषयत्वेनानेकबुद्धिविषयतया व्यष्टित्व मित्यर्थः। तत्र दृष्टांतमाह । वृक्षवदित्यादि । उक्तसमष्ट्यवच्छि-न्नचैतन्यस्य सूत्रात्मत्वादिसंज्ञां दर्शयति । एतदिति । तत्र हेतु-माह । सर्वत्रानुस्यूतत्वादिति। सर्वप्राणिलिंगशरीरेष्वनुस्यूतत्वा-द्विद्यमानत्वादित्यर्थः । हेत्वंतरमाह । ज्ञानेच्छेति । ज्ञानेच्छा-क्रियाशक्तिमत्कोशत्रयोपाध्यवच्छिन्नत्वादित्यर्थः ॥ ४८ ॥

(भा०टी०) जैसे वन और तालाव, वृक्ष और जलका समष्टि है । तिसी प्रकार समस्त सूक्ष्मशरीर एकरूपसे शरीर समष्टि है इसी प्रकार जैसे वृक्ष और जल, वन और ताला-वका व्यष्टि है । तिसीप्रकार अनेक रूपद्वारा शरीर व्यष्टि है। इसी सूक्ष्मशरीरका समष्टिरूप उपाधिसे उपहित चैतन्यको सू-त्रात्मा, हिरण्यगर्भ और प्राण कहाजाता है । इसी कारण यही चैतन्य वस्त्रमें स्थित सूत्रकी तरह सबमें परिव्याप्त तथा ज्ञान, इच्छा और क्रियाशक्तिविशिष्ट अपञ्चीकृत पञ्चभूत का अभिमानी होता है ॥ ४८ ॥

अस्यैषा समष्टिः स्थूलप्रपंचापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासना-मयत्वात् स्वप्नः । अत एव स्थूलप्रपंचलयस्थान-मिति चोच्यते । एतद्व्यष्ट्युपहितं चैतन्यं तैज-सो भवति तेजोमयान्तःकरणोपहितत्वात् ॥ ४९॥

(सं०टी०) विज्ञानमयादिकोशत्रयस्य सूक्ष्मशरीरतां

दर्शयति। अस्यैषेति। अस्य सूत्रात्मनो हिरण्यगर्भाख्यस्य विज्ञानमयादिकोशत्रयं शरीरं अस्य स्थूलप्रपंचापेक्षया सूक्ष्मत्वादित्यर्थः।अस्यैव विज्ञानमयादिकोशत्रयस्य स्वप्नत्वे युक्तिमाह। जाग्रदिति। विराट्स्वरूपेणानुभूतस्थूलप्रपंचविषयवासनामयत्वात्स्वप्नत्वमस्येत्यर्थः। यतः स्वप्नत्वं सूक्ष्मत्वं च। अत एव स्थूलप्रपंचलयस्थानमित्युच्यत इत्यर्थः। विज्ञानमयादिसमष्ट्युपाध्यवच्छिन्नचैतन्यस्य हिरण्यगर्भत्वं प्रतिपाद्येदानीं तद्व्यष्ट्युपलक्षितचैतन्यस्य तैजसत्वं निरूपयति। एतदिति। अत्र हेतुमाह तेजोमयेति ॥ ४९ ॥

(भा०टी०) हिरण्यगर्भको उपाधिस्वरूप इसी स्थूलशरीरके समष्टि स्थूल प्रपञ्चसे सूक्ष्म होता है। इसी कारण उसको सूक्ष्मशरीर और कोशत्रय कहते हैं। तथा जाग्रत्‌अवस्थाका वासनात्मक हेतु, स्वप्न, और स्थूल, प्रपञ्चका लयस्थान कहा जाताहै। इसी स्थूलशरीरके व्यष्टिरूप उपाधिसे उपहित चैतन्यको तैजस कहते हैं। इसी कारण तेजोमय अन्तःकरण उसका उपाधि है ॥ ४९ ॥

अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नः। अत एव स्थूलशरीरलयस्थानमिति चोच्यते। एतौ सूत्रात्मतैजसौ तदानीं सूक्ष्माभिर्मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः। "प्रविविक्तभुक् तैजसः" इत्यादिश्रुतेः ॥ ५० ॥

(सं०टी०) व्यष्टिरूपं विज्ञानमयादिकोशत्रयं तैजसस्यापि सूक्ष्मं शरीरमिति दर्शयति । अस्यापीति । सूक्ष्मशरीरत्वे हेतुमाह । स्थूलेति । अस्यापि स्वप्नत्वेहेतुमाह । जाग्रदिति। विश्वचैतन्येनानुभूतस्थूलशरीरविषयवासनामयत्वात्स्वप्नमित्यर्थः।अस्यैव सूक्ष्मशरीरस्य स्थलशरीरलयस्थानत्वे युक्तिमाह । अत एवेति । यथा पूर्वं प्राज्ञेश्वरावज्ञानवृत्तिभिः सुषुप्त्यवस्थायामानंदमनुभवतः तथा हिरण्यगर्भतैजसावपि स्वप्नावस्थायां मनोवृत्तिभिर्वासनामयान् शब्दादिविषयाननुभवत इति दर्शयति ।एताविति। अस्मिन्नर्थे श्रुतिमुदाहरति। प्रविविक्तेति । प्रविविक्तं भुंक्त इति प्रविविक्तभुक् तैजसः तेजोंतःकरणं कार्यादिभावेन परिणतं तदेव स्थूलशरीरादिहीनं यस्य स तैजसः तेजोंतःकरणस्वामीत्यर्थः ॥ ५० ॥

(भा०टी०) पूर्वोक्त तैजसके उपाधिस्वरूप इसी व्यष्टिभूत सूक्ष्मशरीर स्थूलशरीरकी अपेक्षा अत्यन्त सूक्ष्म है। इसी कारण उसको सूक्ष्मशरीर और कोशत्रय कहते हैं। यह सूक्ष्म शरीर वासनामय है इसको स्वप्न और स्थूलशरीरका लयस्थान कहते हैं। सुषुप्ति अवस्थामें यही हिरण्यगर्भ और तैजस दोनों सूक्ष्म, मनकी वृत्तिद्वारा सूक्ष्म विषयका अनुभव करते हैं। इस विषयमें श्रुतिका प्रमाण है कि "तैजसही सूक्ष्म वस्तुका उपभोग करता है" ॥ ५० ॥

अत्रापिसमष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजसयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलव-

त्तद्गतप्रतिबिम्बिताकाशवच्चाभेदः।एवं सूक्ष्मशरीरोत्पत्तिः ॥ ५१ ॥

(सं०टी०) इहापि विज्ञानमयादिकोशत्रयस्य समष्टिरूपस्य तदवच्छिन्नसूत्रात्मनश्च व्यष्टिरूपविज्ञानमयादिकोशत्रयस्य तदवच्छिन्नतैजसचैतन्यस्य च वनवृक्षादि तदवच्छिन्नाकाशादिदृष्टांतमुखेनाऽभेदं दर्शयति । अत्रापीति । समष्टिव्यष्ट्युपाध्योर्वनवृक्षवज्जलाशयजलवच्चाभेदः उपाधिद्वयावच्छिन्नचैतन्ययोः सूत्रात्मतैजसयोरपि वनवृक्षावच्छिन्नाकाशवज्जलाशयजलगतप्रतिबिंबाकाशवच्चाभेद इत्यर्थः ।सूक्ष्मशरीरोत्पत्तिप्रकरणमुपसंहरति । एवमिति ॥ ५१ ॥

(भा० टी०) जैसे वन और वृक्ष यह परस्पर विभिन्न नहीं है जैसे वनावच्छिन्न आकाशसे वृक्षावच्छिन्न आकाश कोई विभिन्न नहीं है जैसे तालावका और जलका कोई भेद नहीं है जैसे जलगत प्रतिबिम्बित आकाशकी और जलाशयके प्रतिबिम्बित आकाशकी कोई विभिन्नता नहीं है इसी प्रकार सूक्ष्म शरीरकी समष्टि और व्यष्टिकी तथा तदुपहित हिरण्यगर्भ और तैजसकी परस्पर विभिन्नता नहीं है। इसीप्रकार सूक्ष्मशरीरकी उत्पत्ति है ॥ ५१ ॥

स्थूलभूतानि तु पंचीकृतानि । पंचीकरणं तु आकाशादिपंचस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पंच भागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्विती-

यार्द्धभागं परित्यज्य भागान्तेषु संयोजनम्। तदुक्तम् "द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः॥ स्वस्वेतरद्वितीयांशैर्योजनात्पंचपंच ते" इति ५२

(सं०टी०) अथेदानीं स्थूलशरीरोत्पत्तिं निरूपयितुमुपक्रमते। स्थूलभूतानि त्विति। तुशब्दः पूर्वस्माद्वैषम्यं द्योतयति। पंचीकृतानीति। अपंचीकृतसूक्ष्मभूतापेक्षया स्थूलभूतानि पंचीकृतानीत्यर्थः। पंचीकरणमेव प्रतिपादयितुं प्रतिजानीते। पंचीकरणं त्विति। पंचीकरणप्रकारमेवाह।आकाशादीति। अयमर्थः। सृष्टिकाले सकलप्राण्यदृष्टवशादीश्वरप्रेरणयाकाशवायुतेजोबन्नान्यनाद्यविद्यासहायभूतात्परमात्मनः सकाशादनुक्रमजातानि तान्यपंचीकृतानि सूक्ष्माणि व्यवहारासमर्थानीति कृत्वा तदीयस्थौल्यापेक्षायां व्यवहर्तृप्राणिजातधर्माधर्मापेक्षयैव तान्येव भूतानि पंचीकृतानि भवंति तानिच प्रत्येकं द्वैविध्यमापद्यंते तेष्वाकाशादिषु दशसु भागेषु प्राथमिकान्पंचभागान्प्रत्येकं चतुर्धा समं विभज्य स्वार्धभागपरित्यागेन चतुर्णां प्रत्यकं भागांतरेषु संनिवेशेन पंचीकृतानि स्थूलानि भवंतीति। अस्मिन्नर्थे वृद्धसंमतिमाह। द्विधेति॥ ५२॥

(भा०टी०) इकट्ठेहुए आकाश आदि पञ्चभूतोंको स्थूल भूत कहते हैं इसी आकाशआदि पञ्चभूतोंके मध्यमेंसे प्रत्येक भूतको समान भाग करनेसे दश १० भाग होते हैं तदन्तर उन्ही दश भागके प्रथम पञ्चम भागको प्रत्येक पञ्चभूतके समान चार भाग करकै उन्ही सम्पूर्ण प्रत्येक चार भागोंके द्वि-

तीय अर्द्धको छोड़कर और चार भूतके द्वितीयार्द्ध भागके सहित मिलानेको पंचीकरण कहते हैं । इस विषयके प्रमाण स्वरूप अन्यान्य ग्रन्थोंमेंभी लिखा है—"पञ्चभूतके प्रत्येकके समान दो भाग करै फिर उसी पञ्चभूतके प्रत्येक प्रथम भाग के चार भाग करै द्वितीय पञ्चभूतके प्रत्येक प्रथम अंशमें प्रत्येक चार भागके मिलानेको पञ्चीकरण कहतेहैं" ॥ ५२ ॥

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रु
तेः पंचीकरणस्याप्युपलक्षणार्थत्वात् ।
पंचानां पंचात्मकत्वे समानेऽपि "तेषु च
वैशिष्ट्याात्तु तद्वादस्तद्वादः" इति न्यायेन
आकाशादिव्यपदेशः संभवति ॥ ५३ ॥

(सं०टी०) पंचीकरणस्य त्रिवृत्करणप्रतिपादकश्रुत्यंतरविरोधमाशंक्य परिहरति । अस्याप्रामाण्यमिति। भूतत्रयसृष्टिश्रुतौ सृष्टिपरिपूर्णार्थमन्यत्र श्रुतमपि भूतद्वयमाश्रित्य भूतपंचकाभिप्रायेण भूतत्रयसृष्टिप्रतिपादनादविरोध इत्यर्थः । आकाशादीनां पंचभूतानां चतुर्धा विभक्तानामन्योन्यं प्रत्येकानुप्रवेशेन पंचीकृतानां पंचात्मकत्वाविशेषादाकाशादिव्यपदेशो न स्यादित्याशंक्य परिहरति । पंचानामिति । आकाशादीनां पंचानां पंचात्मकत्वे समानेपि तेषु पंचभूतेषु तत्तद्विशेषानुप्रवेशात्तन्नामभिर्व्यवहारः संभवतीत्यर्थः ॥ ५३ ॥

(भा०टी०) कहेहुए पञ्चीकरणके प्रमाणविषयकी शङ्का नहीं करनी क्योंकि त्रिवृत्करणकी श्रुतिसे पञ्चीकरण-

काभी उल्लेख होजाता है पञ्चभूतके पञ्चात्मको रूपमें समान अर्थात् मिलेहुए होनेपर प्रत्येक पञ्चभूतका अलग अलग व्यवहार होता है इस विषयमें न्याय प्रमाण है-"आकाशादि पञ्चभूतमें अपने अपने अंशके आधिक्य होनेसे सर्व भूतोंका आकाशादि नाम होता है" ॥ ५३ ॥

तदानीमाकाशे शब्दोऽभिव्यज्यते, वायौ शब्दस्पर्शौ,अग्नौ शब्दस्पर्शरूपाणि,अप्सु शब्दस्पर्शरूपरसाः,पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च ॥ ५४ ॥

(सं०टी०) तदानीमिति । यदा पंचीकृतान्याकाशादीनि तदानीं स्थूलत्वेन स्वकार्योत्पादानसमर्थत्वादाकाशेऽव्यक्तरूपेण स्थितः शब्दः अभिव्यज्यते व्यक्तो भवतीत्यर्थः॥

(भा०टी०)पञ्चभूतके पञ्चीकरणके समय आकाशमें शब्दगुण, वायुमें शब्द और स्पर्श, अग्निमें शब्द स्पर्श और रूप. जलमें शब्द स्पर्श रूप और रस, पृथ्वीमें शब्द स्पर्श रूप रस और गन्ध गुण प्रकाशित होतेहैं ॥ ५४ ॥

एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानामतलवितलसुतलरसातलतलातलमहातलपातालनामकानामधोऽधो विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्गतचतुर्विधस्थूलशरीराणामन्नपानादीनाञ्चोत्पत्तिर्भवति ॥ ५५ ॥

(सं०टी०) उक्तेभ्यो भूतेभ्यः चतुर्दशभुवनोत्पत्तिप्रकारं दर्शयति । एतेभ्य इति । एतेभ्यो भूतेभ्यः समुत्पन्नब्रह्मांडस्य चतुर्विधशरीराणां च तद्योग्यान्नपानादीनां चोत्पत्तिर्भवतीत्यर्थः ॥ ५५ ॥

(भा०टी०) इन्हीं सम्पूर्ण पञ्चीकृत आकाशादि भूतोंसे ऊपर ऊपर विद्यमान भूर्लोक भुवर्लोक स्वर्लोक महर्लोक जनलोक तपलोक और सत्यलोक उत्पन्न होते हैं. इन्हींसे क्रमसे नीचे नीचे होनेवाले अतल वितल सुतल रसातल तलातल महातल और पाताल ये सम्पूर्ण लोक उत्पन्न होते हैं । इसी प्रकार इनपञ्चभूतोंसेही ब्रह्माण्ड और चार प्रकारकेस्थूलशरीर और शरीरोंके भोज्य अन्नपानादि उत्पन्न होतेहैं ॥ ५५ ॥

चतुर्विधस्थूलशरीराणि जरायुजाण्डजस्वेदजोद्भिज्जाख्यानि ॥ जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि । अण्डजानि अण्डेभ्यो जातानि पक्षिपन्नगादीनि । स्वेदजानि स्वेदेभ्यो जातानि यूकमशकादीनि । उद्भिज्जानि भूमिमुद्भिद्य जातानि लतावृक्षादीनि ॥ ५६ ॥

(सं०टी०) चतुर्विधशरीराण्युद्दिशति । चतुर्विधेति । तानि च यथोद्देशं विवृणोति । जरायुभ्य इति ॥ ५६ ॥

(भा० टी०) स्थूलशरीरके चार भेद हैं । जरायुज, अण्डज, स्वेदज, व उद्भिज्ज । जरायुसे उत्पन्न होनेवाले मनुष्य पशु आदिको जरायुज कहते हैं । अण्डसे उत्पन्न होनेवाले

पक्षी सर्पादिको अण्डज कहते हैं। स्वेद (पसीना) से उत्पन्न होनेवाले यूका मशक आदि स्वेदज कहते हैं। पृथ्वीको भेदकर उत्पन्न होनेवाले वेल वृक्ष इत्यादिको उद्भिज्ज कहते हैं ॥ ५६ ॥

अत्रापि चतुर्विधस्थूलशरीरम् ॥ एकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः, वृक्षवज्जलवद्वा व्यष्टिरपि भवति। एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडिति चोच्यते। सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च अस्यैषा समष्टिः स्थूलशरीरं अन्नविकारत्वादन्नमयकोशः। स्थूलभोगायतनत्वाज्जाग्रदिति चोच्यते ॥ ५७ ॥

(सं०टी०) पूर्ववदत्रापि समष्टित्वं व्यष्टिभेदं दर्शयति। अत्रापीति। चतुर्विधशरीरजातमपि शरीरमित्येकबुद्धिविषयतया वनवत्समष्टित्वं प्रत्येकं तत्तच्छरीरविषयतयाऽनेकबुद्धि विषयत्वात् व्यष्टित्वं च लभत इत्यर्थः। अधुना भूरादिचतुर्दशभुवनांतर्गतचतुर्विधस्थूलशरीरसमष्ट्युपहितचैतन्यस्य वैश्वानरत्वापरपर्यायं वैराजत्वं दर्शयति। एतदिति। तत्र युक्तिमाह। सर्वनराभिमानित्वादिति। सर्वप्राणिनिकायेष्वहमित्यभिमानवत्त्वाद्वैश्वानरत्वं विविधं नानाप्रकारेण प्रकाशमानत्वाच्च वैराजत्वं लभत इत्यर्थः। अस्येति। अस्य विराट्चैतन्यस्यैषा पूर्वोक्ता या ब्रह्मांडांतर्गतचतुर्विधस्थूलशरीरसमष्टिरेव स्थूलशरीरमित्यर्थः। अन्नविकारत्वादिति। अन्नविकारबाहुल्यादन्नमयत्वंआत्माच्छादकत्वात्कोशत्वं स्थूलशरी

रादिविषयप्रयुक्तसुखदुःखभोगायतनत्वाच्च स्थूलशरीरत्वं इं-द्रियैरर्थोपलंभाज्जाग्रदवस्थात्वं घटत इत्यर्थः ॥ ५७ ॥

(भा०टी०) जैसे वन वृक्षसमूहकी समष्टि है और सं-म्पूर्ण वृक्ष वनकी व्यष्टि हैं और तालाव जलकी समष्टि है और जल तालावकी व्यष्टि हैं । इसीप्रकार यहाँभी चार प्रकारके शरीर एक जगह इकठे हुए समष्टि कहाते हैं और अलग अ-लग व्यष्टि कहाते हैं । इसी स्थूलशरीरकी समष्टिसे उपहित चैतन्य सर्व देहका अभिमानी अनेक प्रकारसे विराजमान वै-श्वानर और विराट्शब्दसे कहा जाता है । इस समष्टिरूप स्थूलशरीरको अन्नके विकारके निमित्त अन्नमयकोश कहते हैं और वही समष्टि स्थूलभोगका स्थान है इसकारण जाग्रत् शब्दसे कहा जाता है ॥ ५७ ॥

एतद्व्यष्ट्युपहितं चैतन्यं विश्वइत्युच्यते ।सूक्ष्म-शरीराभिमानमपरित्यज्य स्थूलशरीरादिप्रवेष्टृ-त्वात् । अस्याप्येषा व्यष्टिः स्थूलशरीरं अन्नविका-रत्वात् अन्नमयकोषः । स्थूलभोगायतनत्वात् जाग्रदिति चोच्यते ॥ ५८ ॥

(सं०टी०) चतुर्विधं स्थूलशरीरं समष्ट्युपहितं चैतन्यं सप्रपंचमभिधायेदानीं तद्व्यष्ट्युपहितं चैतन्यं अभिधत्ते । एत-दिति । एतेषां चतुर्विधशरीराणां या व्यष्टिः तत्तच्छरीरव्य-क्तिः तदुपहितं चैतन्यं विश्व इत्युच्यत इत्यर्थः। तत्र हेतुमाह । सूक्ष्मशरीराभिमानमिति। सूक्ष्मलिंगशरीराभिमानमपरित्यज्य

स्थूलशरीरेषु प्रविश्य तत्तत्स्थूलशरीरेषु सर्वेषु प्रत्येकमहमि-
त्यभिमानवत्त्वाद्विश्वत्वमित्यर्थः। अस्यापीति । अस्य विश्व-
चैतन्यस्याप्येषा तत्तच्छरीरव्यक्तिविशेषलक्षणा व्यष्टिः सैव
स्थूलशरीरमित्यर्थः। अत्राप्यन्नविकारबाहुल्यादन्नमयत्वं चै-
तन्याच्छादकत्वात्कोशत्वंइन्द्रियैरर्थोपलंभाज्जाग्रत्त्वं चक्रमेण
दर्शयति । अन्नविकारत्वादिति ॥ ५८ ॥

(भा०टी०) व्यष्टिरूप स्थूलशरीरसे जो उपहित चैतन्य
है उसको विश्वशब्दसे कहते हैं । इसी कारण यह चैतन्य
सूक्ष्मशरीरके अभिमानको विना छोड़ेही स्थूलशरीरमें प्रवेश
करता है पूर्वोक्त व्यष्टिको स्थूलशरीर कहा है इसके अन्नवि-
कार स्वरूपको अन्नमयकोश कहते हैं। और वहीं व्यष्टि स्थू-
लभोगका स्थान है इसकारण जाग्रत्शब्दसे कहा जाताहै ५८

तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कप्रचेतो-
ऽश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन
क्रमाच्छब्दस्पर्शरूपरसगन्धान् अग्नीन्द्रोपेन्द्रयम-
प्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्च-
केन क्रमाद्वचनादानगमनविसर्गानन्दान्चन्द्रचतु-
र्मुखशङ्कराच्युतैःक्रमान्नियन्त्रितेनमनोबुद्ध्यहङ्का-
रचित्ताख्येनान्तरिन्द्रियचतुष्केन क्रमात् संश-
यनिश्चयाहङ्कार्यचैतांश्च सर्वानेतान् स्थूलवि-
षयाननुभवतः । "जागरितस्थानो बहिःप्रज्ञः"
इत्यादिश्रुतेः ॥ ५९ ॥

(सं॰टी॰) अधुना जाग्रदवस्थायां विश्ववैश्वानरयोः तत्तद्देवताधिष्ठितश्रोत्रादिभिः चतुर्दशभिः करणैः शब्दादिविषयग्रहणप्रकारं दर्शयति । तदानीमिति । अस्मिन्नर्थे श्रुतिं संवादयति । जागरितेति । जागरितं स्थानं यस्य स जागरितस्थानः बहीरूपादौ चक्षुरादिग्राह्ये प्रज्ञा यस्य स बहिःप्रज्ञः५९

(भा॰टी॰) जाग्रत् कालमें विश्व और वैश्वानर ये दोनों दिशा वायु सूर्य्य वरुण और अश्विनीकुमार इनके द्वारा प्रेरणा कियेहुए कर्ण त्वचा चक्षु जिह्वा और घ्राण इन पाँच ज्ञानेन्द्रियोंकरकै क्रमसे शब्द स्पर्श रूप रस और गन्ध इन पाँच विषयोंका अनुभव करते हैं । इसीप्रकार अग्नि इन्द्र विष्णु यम और ब्रह्मा इनके द्वारा प्रेरणा कियेहुए वाणी पाणि पाद पायु और उपस्थ इन पांच कर्म्मेन्द्रियों करकै क्रमसे वाक्य ग्रहण चलना त्याग और आनन्द इन पाँच बाह्य विषयोंका अनुभव करते हैं और चन्द्रमा ब्रह्मा शिव और विष्णु इन चार देवताओंके प्रेरणा कियेहुए मन बुद्धि अहंकार और चित्त इन चार इन्द्रियों करकै क्रमसे संशय निश्चय अहंकार और चैत्त इन चार स्थूल विषयोंका अनुभव करते हैं इस विषयमें श्रुतिभी प्रमाण है—"जाग्रत् अवस्थामें विश्व और वैश्वानर बाह्य स्थल विषयोंका अनुभव करते हैं" ॥५९॥

अत्राप्यनयोःस्थूलव्यष्टिसमष्टयोस्तदुपाहितयोर्विश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च वा पूर्व-

वदभेदः। एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चो-त्पत्तिः ॥ ६० ॥

(सं०टी०) अनयोर्विश्ववैश्वानरयोर्वनवृक्षावच्छिन्नाकाशदृष्टांतेन जलाशयगतप्रतिबिंबाकाशदृष्टांतेन च पूर्ववदभेदं साधयति।अत्रापीति।स्थूलप्रपंचोत्पत्तिमुपसंहरति।एवमिति ६०

(भा०टी०)जैसे वन और वृक्षमें वनावच्छिन्न आकाश और वृक्षावच्छिन्न आकाशमें तथा जलाशयमें और जल में और तालाव प्रतिबिम्बित आकाश और जलप्रतिबिम्बित आकाशमें कुछ भेद नहीं है तिसीप्रकार स्थूलशरीरकी समष्टि और व्यष्टिसे तथा स्थूलशरीरकी समष्टिगत उपहित वैश्वानर और स्थूलशरीरकी व्यष्टिगत उपहित विश्वकाभी कुछ भेद नहीं है इसप्रकार इकट्ठे कियेहुए पञ्चभूतसे स्थूलशरीरकी उत्पत्ति होती है ॥ ६० ॥

एतेषां स्थूलसूक्ष्मकारणशरीरप्रपञ्चानां समष्टिरेको महान्प्रपञ्चो भवति। यथा अवान्तरवनानां समष्टिरेकं महद्वनम्। यथावाअवान्तरजलाशयानां समष्टिरेको महाञ्जलाशयः। तदुपहितविश्ववैश्वानरादीश्वरपर्यन्तं चैतन्यमपि अवान्तरवनावच्छिन्नाकाशवदवान्तरजलाशयगतप्रतिबिम्बिताकाशवच्च एकमेव ॥ ६१ ॥

(सं०टी०) स्थूलसूक्ष्मकारणप्रपंचानां व्यष्टिभूतानां प्रत्येकं विवक्षयाऽवांतरप्रपंचत्वमभिधायेदानीं तेषां समष्टिरेवैकं

महाप्रपंचत्वं दर्शयति। एतेषामिति । तत्र दृष्टांतमाह। यथे- ति । यथा धवखदिरपलाशाद्यवांतरवनानां समष्टिः समुदा- यविवक्षया एकं महद्वनं भवति । यथा वा वापीकूपतडागा- द्यवांतरजलाशयानां समष्टिः समुदायविवक्षया एको महाज- लाशयो भवति ।तथैतेषां स्थूलसूक्ष्मकारणावांतरप्रपंचानाम- पि समष्टिः समुदायविवक्षया एको महान्प्रपंचो भवतीत्यर्थः । एतदेवाऽवांतरमहाप्रपंचोपहितानां विश्वतैजसप्राज्ञानां वैश्वान- रहिरण्यगर्भाव्याकृतानां चावांतरवनावच्छिन्नाकाशवदवांतर- जलाशयगतप्रतिबिंबाकाशवच्चाभेदइत्याह।एतदुपहितमिति ॥

(भा०टी०) जिसप्रकार अलग अलग वनोंकी समष्टिसे एक बड़ा वन हो जाताहै । तथा अलग अलग तालावोंकी समष्टिसे एक बड़ा तालाव होजाताहै इसीप्रकार स्थूल कारण और सूक्ष्म शरीरके प्रपञ्चकी समष्टिसे एक बडा प्रपञ्च होजा ताहै जैसे सम्पूर्ण वनावच्छिन्न आकाश और यावत् जलाश- यगत प्रतिबिम्बित आकाश एकही आकाश है तिसीप्रकार स- म्पूर्ण प्रपञ्चावच्छिन्न वैश्वानर, विश्व, हिरण्यगर्भ, तैजस और प्राज्ञ और ईश्वर यह सब एकही चैतन्य है ॥ ६१ ॥

आभ्यां महाप्रपञ्चतदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सत् अनुपहितं चैतन्यं“सर्वं खल्विदं ब्रह्मैव”इति महावा- क्यवाच्यं भवति विविक्तं सल्लक्ष्यमपि भवति।

(सं०टी०)चैतन्यप्रपंचयोर्भेदे“ सर्वं खल्विदं ब्रह्म”इति

श्रुत्या विरोधमाशंक्य परिहरति । आभ्यामिति । उक्तमहत्प्रपंचं तदवच्छिन्नचैतन्याभ्यां तप्तायःपिंडवदन्योन्यतादात्म्याध्यासापन्नं यद्वस्तु श्रुतं तदवच्छिन्नचैतन्यं "सर्वं खल्विदं ब्रह्म" इति वाक्यस्य वाच्यं भवति। अन्योन्यतादात्म्याध्यासरहितं सल्लक्ष्यं भवतीत्यर्थः ॥ ६२ ॥

(भा० टी०) जैसे जलतेहुए लोहेसे अभिन्न अग्नि "अयो दहति" इस वाक्य वाच्य होता है और पृथक् रूप इस वाक्य लक्ष्य होता है तिसीप्रकार महत्प्रपंचावच्छिन्न चैतन्य इस महत्प्रपञ्चसे अभिन्न होकर (सर्वं खल्विदं ब्रह्म) इस वाक्यका वाच्य होता है और और पृथक् रूप होकर इस महावाक्यका लक्ष्य होता है ॥ ६२ ॥

एवं वस्तुन्यवस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः । इदानीं प्रत्यगात्मनि इदमिदमयमारोपयतीति विशेष उच्यते । तथाच अतिप्राकृतस्तु "आत्मा वै जायते पुत्रः" इत्यादिश्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात् पुत्रे पुष्टे नष्टेऽहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति । चार्वाकस्तु "स वा एष पुरुषोऽन्नमयः"- इत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरामत्मेति वदति । अपरश्चार्वाकः "ते ह प्राणाः प्रजापतिं समेत्य ऋयुः" इत्यादि-

श्रुतेः इन्द्रियाणामभावे शरीरचलनाभावात्काणो-हं बधिरोहं इत्याद्यनुभवाच्च इन्द्रियाण्यात्मेति वदति ॥ ६३ ॥

(सं०टी०) अध्यारोपप्रकरणमुपसंहरति । एवमिति । ईश्वरचैतन्ये सामान्यतो महाप्रपंचाध्यारोपप्रकारं सप्रपंच-मभिधायेदानीं प्रत्यगात्मनि विशेषाध्यारोपप्रकारं दर्शयितुमु-पक्रमते । इदानीमित्यादिना । अध्यारोपमेवाह । इदमिदमि-ति । प्रत्यक्षादिसंनिहितस्यापत्यादिधर्मिण इदमिदं विनिर्देशः क्रियते ।इदमिदमित्यादेर्वीप्सा। तथा चातिस्थूलबुद्धिस्तु इद-मपत्यादिकमेवाहम् । अयं पुत्र एवाहमित्यत्यंतबाह्यधर्मवि-शेषणात्मन्यध्यारोपयतीत्यर्थः । अत्र श्रुतिमाह । आत्मा वा इति । तत्र युक्तिमाह । स्वस्मिन्निति । यथा स्वशरीरे प्रेमदर्शनादात्मत्वभ्रमः एवं स्वपुत्रादिशरीरेपि प्रेमदर्शनादात्म-त्वभ्रम इत्यर्थः। अत्रानुरूपमनुभवमाचष्टे । पुत्र इति।एतदपेक्ष-या विशिष्टबुद्धिरन्यः कश्चिदधिकारी स्वदेहमेवात्मानं मन्य-त इत्याह । चार्वाकस्त्विति।अत्रापि श्रुतिमाह।स वा इति।पु-त्रादिशरीरस्यात्मत्वाभावे युक्तिं दर्शयन् पूर्वोक्ताधिकारिणः सकाशात्स्वस्य वैलक्षण्यं दर्शयति । प्रदीप्तगृहादिति । देह-स्यात्मत्वेऽनुभवं च प्रमाणयति । स्थूलोहमिति । ततोप्युत्कृ-ष्टः कोप्यधिकारी श्रुतियुक्त्यनुभवेभ्यः इंद्रियाण्यात्मेति व-दति इत्याह । अपर इति ॥ ६३ ॥

(भा०टी०) इसप्रकार संक्षेपसे वस्तुरूप ब्रह्मचैतन्यमें

अवस्तुका आरोपस्वरूप अध्यारोप दिखलाया। अब विशेष रूपसे जीवचैतन्यमें अध्यारोप अर्थात् कौन कौन मतावलम्बी किस किस वस्तुको जीवात्मा कहते हैं सो दिखाते हैं। अति अज्ञानी पुरुष पुत्रको आत्मा कहते हैं और इस श्रुतिका प्रमाण देते हैं-"आत्माही पुत्ररूप होकर जन्म लेता है"। परन्तु युक्तिभी आश्चर्य ढंगकी देते हैं-कहतेहै "अपनेमें जिसप्रकार प्रेम होता है पुत्रमेंभी तिसीप्रकार प्रेमका अनुभव होता है इसकारण पुत्रही आत्मा है इस विषयमें और अनुभवभी है जैसे पुत्रके पुष्ट होनेपर मै पुष्ट होगया और पुत्रके नष्ट होनेपर मैं नष्ट होगया इसप्रकार ज्ञान होता है इसकारण पुत्रही आत्मा है". और चार्वाक मातावलम्बी तौस्थूलशरीरको आत्मा कहते हैं और इस श्रुतिका प्रमाणभी देते है-"अन्नमय रसके विकारयुक्त यह पुरुषही आत्मा है"। और यह युक्ति देते हैं कि "सब पुरुष पुत्रकाभी परित्याग करके जलते हुए घरमेंसे अपने बचानेका उपाय करते हैं" और इस विषयमें अनुभवभी है. ऐसा कहते हैं क्योंकि "मैं पुष्ट हूँ मैं दुर्बल हूँ" ऐसा ज्ञान सर्व साधारणको होता है इसकारण स्थूल शरीरही आत्मा है दूसरे चार्वाकमतावलम्बी तौ इन्द्रियोंके समूहको आत्मा कहते हैं और इस श्रुतिका प्रमाण देते हैं-"इन्द्रियोंका समूह ब्रह्माके समीप जाता है तब इन्द्रियोंके न होनेसे शरीर कुछ व्यापार नहीं कर सक्ता है" इसकारण इन्द्रियसमूहही आत्मा है और यह युक्ति देते हैं"मैं अन्धा हूँ,

मैं बधिर हूँ' इसप्रकार ज्ञान सबको होता है इससे इन्द्रिय गणही आत्मा है" ॥ ६३ ॥

अपरश्चार्वाकः "अन्योऽन्तर आत्मा प्राणमयः" इत्यादिश्रुतेः प्राणाभावे इन्द्रियचलनायोगात् अहमशनायावानहं पिपासावान् इत्याद्यनुभवाच्च प्राण आत्मेति वदति । अन्यस्तु चार्वाकः "अन्योन्तर आत्मा मनोमयः" इत्यादिश्रुतेः मनसि सुप्ते प्राणादेरभावात् अहं सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति ॥ ६४ ॥

(सं०टी०) ततोप्युत्तमोऽधिकारी कश्चिच्छ्रुतिप्रमाणानुभवयुक्तिबलात् प्राण एवात्मेत्याह । अपर इति । ततो विशिष्टोधिकारी कश्चित्स्वमतानुकूलश्रुत्यादिबलान्मन एवात्मेत्याह । अन्यस्त्विति ॥ ६४ ॥

(भा०टी०) कोई कोई चार्वाकमतावलम्बी प्राणको आत्मा कहते हैं और इस श्रुतिका प्रमाण देते हैं—"प्राणमय अन्तरात्मा शरीरादिसे भिन्न है।" और मतके स्थापनके अर्थ ऐसी युक्ति देते हैंकि—।"जिस समय शरीरमें प्राण नहीं रहता है तब इन्द्रियोंके समूहसे कोई क्रिया नहीं होसक्ति है । इससे प्राणही आत्मा है" और यह युक्ति दिखाते हैं—"मैं क्षुधार्त्त हूँ, पिपासातुर हूँ' इसप्रकार आपण्डितपामरपर्य्यन्तको अनुभव होता है इसकारण प्राणही आत्मा है" । कोई कोई चार्वाक मतावलम्बी मनको आत्मा कहते हैं और इस श्रुतिका प्रमाण

देते हैं–"मनोमय अन्तरात्मा शरीर, इन्द्रिय और प्राण इनसे भिन्न है" इसकारण मनही आत्मा है। और अपने मतकी प्राधान्यता और रक्षाके अर्थ यह युक्ति देते हैं–"जिस समय मन स्वभावस्थामें होता है तब प्राणादिका अभाव होता है। और मुझको यह संकल्प है और यह विकल्प है इसप्रकार अनुभवभी सबहीको होता है" इसकारण मनही आत्मा है॥ ६४॥

बौद्धस्तु "अन्योऽन्तर आत्मा विज्ञानमयः" इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभावात् 'अहं कर्त्ता अहं भोक्ता' इत्याद्यनुभवाच्च बुद्धिरात्मेति वदति ॥ ६५ ॥

(सं० टी०) उक्तेभ्यः पंचभ्यो विलक्षणः कश्चिद्विज्ञानवादी श्रुत्यादिभिर्विज्ञानमात्मेत्याह। बौद्धस्त्विति ॥ ६५ ॥

(भा० टी०) बौद्धमतावलम्बी बुद्धिको आत्मा कहते हैं और इस श्रुतिका प्रमाण देते हैं–"विज्ञानमय अन्तरात्मा शरीर, प्राण और मन इनसे भिन्न है" और यह युक्ति देते हैं–"जिस समय कर्त्ताका अभाव होता है तबही करणकी शक्तिका अभाव होता है। ऐसी प्रतीति है और बुद्धिके अभाव होनेपर इन्द्रियोंकी शक्तिका अभाव देखनेमें आता है। और 'मैं कर्त्ता हूँ मैं भोक्ता हूँ' इसप्रकार अनुभवभी आपामर पण्डित साधारण सबहीको होता है इसकारण बुद्धिहीको आत्मत्वसिद्ध होता है" ॥ ६५ ॥

प्राभाकरतार्किकौ तु "अन्योऽन्तर आत्मा

आनन्दमयः" इत्यादिश्रुतेः सुषुप्तौ बुद्धया-
दीनामज्ञाने लयदर्शनात् 'अहमज्ञः' इत्या-
द्यनुभवाच्च अज्ञानमात्मेति वदतः ॥ ६६ ॥

(सं०टी०) उक्तेभ्योतिरिक्तौ प्राभाकरतार्किकौ स्वमतोपयोगिश्रुत्यादिसद्भावादज्ञानमात्मेति वदत इत्याह । प्राभाकरतार्किकाविति ॥ ६६ ॥

(भा०टी०) प्राभाकर (मीमांसक) और तार्किक (नैयायिक) तो दोनों अज्ञानकोही आत्मा कहते हैं और इस श्रुतिका प्रमाण देते हैं—"अन्तरात्मा शरीरादिसे भिन्न और आनन्दमय है । " और इसप्रकार युक्ति प्रमाण देते हैं कि—"सुषुप्ति अवस्थामें अज्ञानमें बुद्धयादिका लय होता है और 'मैं मूर्ख हूँ मैं ज्ञानी हूँ' इसप्रकार अनुभवभी यावन्मात्रको होता है इसकारण अज्ञानही आत्मा है" ॥ ६६ ॥

भट्टस्तु "प्रज्ञानघनएवानन्दमयआत्मा"
इत्यादिश्रुतेःसुषुप्तौप्रकाशाप्रकाशसद्भा-
वात् मामहं जानामीत्याद्यनुभवाच्च अ-
ज्ञानोपहितं चैतन्यमात्मेति वदति ॥ ६७ ॥

(सं०टीका) अन्यभट्टस्त्वज्ञानावच्छिन्नचैतन्यमात्मेत्याह । भट्टास्त्विति ॥ ६७ ॥

(भा०टी०) भट्टमतावलम्बी कोई मीमांसक अज्ञानसमष्टिद्वारा उपहित चैतन्य अर्थात् ईश्वरचैतन्यकोही आत्मा कहते हैं और इस श्रुतिका प्रमण देते हैं—"आत्माही प्रज्ञान-

घन तथा आनन्दमय है" और इसप्रकार युक्ति प्रमाण देते हैं कि-"सुषुप्तिकालमें सबके लीन होनेपरभी अज्ञानोपहित चैतन्यका प्रकाश रहता है और मैं अपनेको नहीं जानता हूँ ऐसा अनुभव होता है । इसकारण अज्ञानोपहितचैतन्यही आत्मा है" ॥ ६७ ॥

अपरो बौद्धः "असदेवेदमग्र आसीदित्यादिश्रुतेःसुषुप्तौ सर्वाभावादहं सुप्तःसुषुप्तौ नासमित्युत्थितस्य स्वभावपरावर्शविषयानुभवाच्च शून्यमात्मेति वदति ॥ ६८॥

(सं०टी०) बौद्धैकदेशी कश्चिच्छुत्यादिभिः शून्यमात्मेति वदतीत्याह । अपर इति ॥ ६८ ॥

(भा ०टी०) कोई बौद्धमतावलम्बी शून्यकोही आत्मा कहते हैं । और इस श्रुतिका प्रमाण देते हैं-"जगत् पहले असत् था" और यह युक्ति देते हैं कि-"सुषुप्तिकालमें बुद्ध्यादि सबका अभाव होता है और सुषुप्तिसे उठकर पुरुष को ऐसा ज्ञान होता है कि सुषुप्तिमें मेरा अभाव होगया था इस अनुभवके कारण शून्यही आत्मा है" ॥ ६८ ॥

एतेषां पुत्रादीनां शून्यपर्य्यन्तानामनात्मत्वमुच्यते। एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुति युक्त्यनुभवाभासैरात्मबाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेवेति ॥ ६९ ॥

(सं०टी०) अधुना पुत्रादिशून्यपर्यंतानामात्मत्वप्रतिपादकश्रुत्यादेराभासत्वात्पूर्वपूर्वमतस्योत्तरोत्तरमतबाध्यत्वाच्च दृश्यत्वजडत्वादिहेतुकदंबकैश्चानात्मत्वं प्रसिद्धमेवेति प्रतिपादयितुं प्रतिजानीते । एतेषामिति । पुत्राद्यात्मवादिनामतिमंदाधिकारित्वात्तत्तत्प्रतिपादितश्रुत्यादेरपि पूर्वपूर्वस्योत्तरोत्तरबाध्यत्वात्पुत्रादिशून्यांतानामनात्मत्वं प्रसिद्धमेवेति प्रतिज्ञातमेवार्थं प्रकटयति । एतैरिति ॥ ६९ ॥

(भा०टी०) ठीक तो यह है । पुत्रको आदिले शून्य पर्य्यन्त किसीको आत्मा नहीं कहा जाता है क्यौंकि पुत्रादिकोंका अनात्मत्व स्पष्ट मालूम होता है जो पुत्रादिको आत्मा कहे हैं वे बड़े मूढ़ हैं उनका पहले दिखाया हुआ श्रुतिप्रमाण युक्तिप्रमाण और अनुभवप्रमाण ये सब उत्तरोत्तर दिखाये हुए प्रमाण युक्ति और अनुमानद्वारा सबका खण्डन होजाता है इसी कारण पूर्वोक्त मतावलम्बियोंने जो पुत्रादिको आत्मा कहा है सो ठीक नहीं है ॥ ६९ ॥

"किञ्च प्रत्यगस्थूलो अचक्षुरप्राणो अमना अकर्त्ता चैतन्यं चिन्मात्रं सत" इत्यादिप्रबलश्रुतिविरोधात् अस्य पुत्रादिशून्यपर्य्यन्तस्य जड़स्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वात् अहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्य्यन्तमखिलमनात्मैव ॥ ७० ॥

(सं०टी०) ननु पुत्रादिशून्यपर्यंतानामनात्मत्वे सिद्धे कस्तर्ह्यहंप्रत्ययविषय आत्मेत्याशंक्य आस्थूलादिनिषेधवाक्यजातबोधितं"सत्यंज्ञानमनंतंब्रह्म"इत्यादिविधिवाक्यकोटिबोधितं यत्सत्यं ज्ञानानंताद्वयं ब्रह्म तदेवाहंप्रत्ययालंबनमिति प्रबलश्रुतियुक्त्यनुभवैःप्रतिपादयितुमाह। किंचेति। अस्थूलादिप्रबलश्रुतिवाक्यैः पुत्रादिशून्यपर्यंतात्मातिरिक्तात्मस्वरूपप्रतिपादनात् पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वमित्यर्थः। अस्मिन्नर्थे प्रबलविद्वदनुभवं प्रमाणयति। अहमिति। पुत्रादिश्रुत्यादीनां दौर्बल्यं दर्शयति। तत्तदिति। यतः पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वमतः पुत्रादिभासकं नित्यशुद्धत्वादिस्वरूपमेवात्मवस्त्वित्यर्थः। नहीदं विरुद्धं यत्पुत्राणामात्मत्वप्रतिपादकश्रुतीनामप्रामाण्यं अस्थूलादिश्रुतीनां प्रामाण्यमिति न हि वेदवाक्येषु केषांचिदप्रामाण्यं केषांचित्प्रामाण्यमिति चाशक्यं प्रतिपादयितुम्। एवं चेत्पुत्रादिश्रुतीनां प्रामाण्यमस्थूलादिवाक्यानामप्रामाण्यमिति वैपरीत्यं किं न स्यात्। वेदवाक्यत्वाविशेषात्। किंच केषांचिद्वेदवाक्यानामप्रामाण्यं केषांचिद्वेदवाक्यानां प्रामाण्यं प्रतिपादनार्थमिदं प्रकरणमारब्धं अतः कथं निर्णय इति चेत्, उच्यते। पुत्रादिश्रुतीनां सर्वथैव प्रामाण्यं नास्तीत्यस्माभिर्न निषिध्यते किंत्वस्थूलादिप्रबलश्रुतिस्मृतिन्यायविरोधात्स्वार्थे तात्पर्याभावात्तेषां स्थूलारुंधतीन्यायेन पूर्वपूर्वनिराकरणद्वारा सूक्ष्मसूक्ष्मवस्तूपदेशे तात्पर्यमिति एतावदेव प्रतिपाद्यते। तथाहि ध्रुवमरुंधतीं च दर्शयतीति विधि-

बलाद्वरवध्वोररुंधतीदर्शने प्राप्ते परमसूक्ष्मरूपाया अरुंधत्याः प्रथमकक्षायामेव प्रतिपत्तुमशक्यत्वात्प्रथमं चंद्रज्योतीरूपारुंधतीत्युच्यते ततः चंद्रभिन्ना तारकारुंधतीत्युच्यते तत इतरतारकाभिन्ना सप्ततारकात्मकारुंधतीत्युच्यते तदनंतरमितरतारकाचतुष्टयभिन्ना तारकात्रितयात्मकेत्युच्यते ततः तन्मध्ये तारकेत्युच्यते ततस्तत्समीपवर्तिनी परमसूक्ष्मारुंधतीत्युच्यते न चैतावतैतेषां पंचानां वाक्यानां परस्परविरुद्धार्थप्रतिपादकत्वेनाप्रामाण्यंशक्यं प्रतिपादयितुम्। किंतु प्रतिपत्तृबुद्ध्यनुसारेण सोपानक्रमवत्पूर्वपूर्वनिराकरणद्वारा सूक्ष्मारुंधतीप्रतिपादने तात्पर्यं तद्वदत्रापि अन्नमयः प्राणमयो मनोमयो विज्ञानमय आनंदमय आत्मा ब्रह्मपुच्छं प्रतिष्ठेति पुच्छब्रह्मपर्यवसितानां पंचकोशवाक्यानामपि परस्परविरुद्धार्थप्रतिपत्तृबुद्ध्यनुसारेण सोपानक्रमवत्पूर्वपूर्वनिराकरणद्वारा परमसूक्ष्मपुच्छब्रह्मप्रतिपादने तात्पर्यं तस्मात्सर्वेषां वेदवाक्यानां साक्षात्परंपरया वाऽद्वितीयवस्तुप्रतिपादने तात्पर्यात्प्रामाण्यरूपविरोध इति संक्षेपः ७० ॥

(भा० टी०) यदि पुत्रादिको आत्मा कहेंगे तब श्रुति आदि प्रमाणोंको अत्यन्त विरोध पड़ैगा क्योंकि—"आत्मा स्थूल नहीं है, आत्मा इन्द्रियगण नहीं है, प्राण नहीं है, मन नहीं है, और कर्त्ता नहीं है, परन्तु केवल चैतन्यमय सत्य स्वरूप है"। इत्यादि प्रबल श्रुतिद्वारा प्रमाण होता है। पुत्रादिसे शून्यपर्य्यन्त जड़के चैतन्यके भासक हेतु घटादिकी तरह अनित्य है अर्थात् हेत्वाभास है और ज्ञानियोंको मैंही ब्रह्म हूं

इ सप्रकार दृढ़ अनुभव होता है इसकारण पुत्रको आदिले शून्यपर्य्यन्त कोई पदार्थ आत्मा नहीं कहाजासक्ता। पुत्रादिको आत्मा कहनेपर पूर्वोक्त श्रुति, युक्ति, अनुभव, प्रमाणका विरोध होगा इसकारण पुत्रादिको अनात्मत्व स्पष्ट मालूम होता है॥ ७०॥

अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्य स्वभावं प्रत्यक्चैतन्यमेवात्मतत्त्वमिति वेदान्तविदनुभवः। एवमध्यारोपः॥ ७१॥

(सं०टी०) विशेषाध्यारोपप्रकरणमुपसंहरति।एवमिति७१

(भा०टी०) ठीक तौ जो पुत्रको आदिले शून्य पर्य्यन्तका प्रकाशक है और जो नित्य, शुद्ध, सर्वज्ञ, मुक्त, सत्यस्वरूप, प्रत्यक् चैतन्य है वही आत्मा है ऐसा वेदान्तशास्त्र के जाननेवालोंका अनुभव है। इसप्रकार वस्तुमें अवस्तुका अध्यारोपस्वरूप अध्यारोपन्यायविशेषरूपसे दिखाया।७१॥

अपवादोनाम रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्। तदुक्तम् "सतत्वतोऽन्यथाप्रथा विकारइत्युदीरितः। अतत्वतोऽन्यथाप्रथाविवर्त्तइत्युदाहृतः"॥ ७२॥

(सं०टी०) आत्मवस्तुनि मिथ्याप्रपंचस्य सामान्यतो विशेषतश्चाध्यारोपप्रकारं सप्रपंचमभिधायेदानीं तदपवादप्र-

कारं वक्तुमारभते। अपवादो नामेति। असंगोदासीने परमात्मवस्तुनि तद्विवर्त्तावस्तुभूताज्ञानादिमिथ्याप्रपंचस्य चिद्वस्तुमात्रावशेषतयाऽवस्थानमेवापवाद इति वक्तुं प्रथमं लौकिकदृष्टांतमाह। रज्जुइति। रज्जुस्वरूपापरित्यागेन सर्पाकारेण भासमानस्य रज्जुविवर्तस्यापवादो नाशो नामाधिष्ठानरज्जुमात्रतयाऽवस्थानवच्चिद्विवर्तस्याज्ञानादिप्रपंचस्य अपवादो नाशो नामाचिन्मात्रत्वेनावस्थानमित्यर्थः। अत्र यथास्वरूपेणावस्थितस्य वस्तुनोऽन्यथाभावो द्विधाभवति परिणामभावो विवर्त्तभावश्चेति तत्र परिणामभावो नाम वस्तुनो यथार्थतः स्वस्वरूपं परित्यज्य स्वरूपांतरापत्तिः यथा दुग्धमेव स्वस्वरूपं परित्यज्य दध्याकारेण परिणमते। विवर्त्तभावस्तु वस्तुतः स्वरूपापरित्यागेन स्वरूपांतरेण मिथ्याप्रतीतिः। यथा रज्जुः स्वरूपापरित्यागेन सर्पाकारेण मिथ्या प्रतिभासते। अत्र वेदांते ब्रह्मणि प्रपंचभानस्य परिणामभावो नांगीक्रियते दुग्धादिवद्ब्रह्मणो विकारित्वप्रसंगादानित्यत्वादिदोषापत्तेः। विवर्त्तभावांगीकारे तु नायं दोषः, ब्रह्मणि प्रपंचभानस्य मिथ्यात्वेन विकारित्वाभावात्। तदुक्तम् "अधिष्ठानावशेषो हि नाशःकल्पितवस्तुनः" इति। तस्माच्चिद्विवर्त्तस्य प्रपंचस्य चिन्मात्रावशेषतयावस्थानमेवापवाद इति भावः। अस्मिन्नर्थे ग्रंथांतरसंवादं दर्शयति। तदुक्तमिति ॥ ७२ ॥

(भा॰टी॰) अब अपवादन्याय दिखाते हैं। रज्जुमें सर्पका भ्रम होकर जिस समय वह भ्रम नष्ट होजाता है उस स-

मय जैसे सर्पज्ञान नष्ट होजाय है तब केवल रज्जुका ज्ञान रह जाय है। तिसीप्रकार सच्चिदानन्द ब्रह्ममें अवस्तुरूप अज्ञानादि जड पदार्थका भ्रम होकर जिस समय उस भ्रमका नाशहो जाता है तब केवल ब्रह्ममात्र अवस्थित रहता है क्योंकि यह रूप ज्ञानका विवर्त्त है जैसा ग्रन्थान्तरमें कहा है-"जो स्वरूपको विकृत करके कार्य्यको उत्पादन करै वह विकारी वा परिणामी उपादान कारण कहाता है जैसे दूध दधिका विकारी वा परिणामी उपादानकारण है" और जो कारणस्वरूपका विकार विनाही करे कार्य्यका उत्पादन करै है वह उसको विवर्त्त कारण कहते हैं जैसे रज्जु सर्पके ज्ञानके प्रति विवर्त्त कारण है ॥ ७२ ॥

तथाहि खलूच्यते यथा एतद्भोगायतनं चतुर्विधं स्थूलशरीरजातं एतद्भोग्यरूपान्नपानादिकं एतदाश्रयभूतभूरादिचतुर्दशभुवनानि एतदाश्रयभूतं ब्रह्माण्डञ्चैतत् सर्वं एतेषां कारणरूपपञ्चीकृतभूतमात्रं भवति। एतानि शब्दादिविषयसहितानि पञ्चीकृतभूतजातानि सूक्ष्मशरीरजातञ्चैतत् सर्वमेतेषां कारणरूपमपञ्चीकृतभूतमात्रं भवति एतदज्ञानं अज्ञानोपहितं चैतन्यं चेश्वरादिकं एतदाधारभूतानुपहितचैतन्यरूपं तुरीयब्रह्ममात्रं भवति आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति। तथाहि। अज्ञानादिसमष्टिः ए-

तदुपहितं
तं चैतन्यञ्चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति ॥ ७३ ॥

(सं०टी०) सामान्यतो दर्शितामपवादप्रक्रियां विस्तरेण प्रतिपादयितुं प्रतिजानीते । तथाहीति । स्थूलसूक्ष्मकारणप्रपंचानामुत्पत्तिवैपरीत्येन तत्तत्कारणरूपेणावस्थानमेवापवाद इत्याह । एतद्भोगायतनमिति । एतत्स्थूलशरीरं स्वाश्रयब्रह्मांडसहितं स्वकारणभूतपंचीकृतेषु पंचमहाभूतेषु लीनं सत्तन्मात्रतयावशिष्यते तानि च पंचीकृतानि भूतानि शब्दादिसहितानि सप्तदशावयवात्मकलिंगशरीराणि च स्वकारणेष्वपंचीकृतभूतेषु लीनानि भवंति तान्यपंचीकृतानि भूतानि सत्त्वादिगुणसहितानि स्वकारणज्ञानोपहितचैतन्ये लीनानि भवंति तच्चाज्ञानं तदुपहितचैतन्यं सर्वज्ञत्वादिविशिष्टंच स्वाधारभूतानुपहितचैतन्ये लीनं भवति चैतन्यमेवावशिष्यत इत्यर्थः । फलितमाह । आभ्यामिति। तत्त्वंपदार्थशोधनप्रकारं प्रतिजानीते । तथाहीति । अज्ञानं तदवच्छिन्नेश्वरचैतन्यं तदनुपहितचैतन्यं चैतत्त्रयं तप्तायःपिंडवदन्योन्येन तादात्म्याध्यासेनैकत्वेन प्रतीयमानं सत् तत्पदवाच्यार्थो भवतीत्यर्थः । तत्पदलक्ष्यार्थमाह । एतदुपाधीति । अज्ञानावच्छिन्नेश्वर-

चैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्ताभ्यां विविक्तं सद्भेदविवक्षया तत्पदलक्ष्यार्थो भवतीत्यर्थः ॥ ७३ ॥

(भा०टी०) भ्रमके नष्ट होनेपर जिसप्रकार यह सम्पूर्ण प्रपञ्च अपने २ कारणमें लीन होकर ब्रह्मरूपमें अवस्थित होता है सो दिखाते हैं। -"स्थूलभोगका स्थानस्वरूप चार प्रकारका स्थूलशरीर और भोग्य अन्नपानादि इन सबके आधारस्वरूप भूलोकको आदिले चौदह लोक और इन्हीं सबके वर्त्तमान स्थानस्वरूप ब्रह्माण्ड यह सम्पूर्ण पञ्चीकृत पञ्चमहाभूत मात्र है। शब्द स्पर्शादि विषयों सहित यह संपूर्ण पञ्चीकृत पञ्चभूत और सूक्ष्मशरीर यह सब अपने अपने कारण रूप अपञ्चीकृत पञ्चमहाभूतमात्र हैं सत्त्व आदि गुणयुक्त यह सम्पूर्ण अपञ्चीकृत पञ्चमहाभूत उत्पत्तिके उलटे क्रमसे अर्थात् पृथिवी जलसे जल अग्निसे अग्नि वायुसे वायु आकाशसे और आकाश अज्ञानसे इसप्रकार कारणरूप अज्ञानोपहित कारणरूप चैतन्य मात्र है। यही अज्ञान और अज्ञानोपहित चैतन्यरूप ईश्वरको आदिले सबही उसके आधारभूत अनुपहित चैतन्यरूप तुरीय ब्रह्म है पूर्वोक्त अध्यारोप और अपवादमें कहीहुई रीतिके द्वारा "तत्" और "त्वम्" इन दोनों पदार्थोंका शोधन(सङ्गति) ठीक होती है अज्ञानादिकी समष्टि अर्थात् अज्ञान, सूक्ष्मशरीर और स्थूलशरीरकी समष्टि तदुपहित चैतन्य अर्थात् ईश्वर, हिरण्यगर्भ और विराट् चैतन्य, और अनुपहित चैतन्य,तुरीय ब्रह्म चैतन्य, यह तीन

प्रकारके पदार्थ दग्ध(तपेहुए)लोहकी तरह अतिरिक्तरूप "तत्" इस पदके वाच्य होते हैं और अज्ञानादिकी समष्टिरूप उपाधि और तदुपहित ईश्वरादि चैतन्यका आधारभूत तुरीयब्रह्मचैतन्य "तत्" पदका लक्ष्यार्थ होता है ॥ ७३ ॥

अज्ञानादिव्यष्टिः तदुपहिताल्पज्ञत्वादिविशिष्टचैतन्यं एतदनुपहितं चैतन्यञ्चैतत्त्रयं तप्तायःपिण्डवदेकत्वेन भासमानं त्वंपदवाच्यो भवति। एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति ॥ ७४ ॥

(सं०टी०) त्वंपदवाच्यार्थमाह। अज्ञानादीति। व्यष्टिभूतपदज्ञानमंतःकरणं तदवच्छिन्नं जीवचैतन्यं तदनुपहितं चैतन्यं चैतत्त्रयं तप्तायःपिंडवत्परस्परतादात्म्याध्यासेनाभेदविवक्षया त्वंपदवाच्यार्थो भवतीत्यर्थः। लक्ष्यार्थमाह। एतदुपाधीति। अंतःकरणोपहितचैतन्यस्याधारभूतंयदनुपहितं प्रत्यगात्मानंदं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवतीत्यर्थः ॥ ७४ ॥

(भा०टी०) अज्ञानादिकी व्यष्टि अर्थात् अज्ञान, सूक्ष्मशरीर और स्थूलशरीर तदुपहितचैतन्य अर्थात् प्राज्ञ तैजस और विश्व तथा अनुपहित चैतन्य अर्थात् तुरीय ब्रह्म चैतन्य, ये तीनों तपेहुए लोहपिण्डकी तरह अभिन्नरूप "त्वम्" पदके वाच्य होते हैं तथा अज्ञानादिकी व्यष्टि और प्राज्ञ आदि चैतन्यका आधारस्वरूप अनुपहित आनन्दरूप तुरीयब्रह्मचैतन्य "त्वम्" इस पदका लक्ष्यार्थ होता है ॥ ७४ ॥

अथ महावाक्यार्थो वर्ण्यते । इदं तत्त्वमसि वाक्यं सम्बन्धत्रयेण अखण्डार्थबोधकं भवति । सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभावश्चेति । यदुक्तम्—"सामानाधिकरण्यं च विशेषणविशेष्यता। लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम्"इति ॥ ७८ ॥

(सं०टी०) पदार्थमभिधाय वाक्यार्थमाह। अथेति।ननु जीवेश्वरयोः किंचिज्ज्ञत्वसर्वज्ञत्वादिविशिष्टयोरत्यंतविलक्षणयोः तत्त्वमस्यादिमहावाक्यानि परस्परविरुद्धार्थप्रतिपादकानि कथमखंडैकरसं ब्रह्म प्रतिपादयंतीत्याशंक्य साक्षादैक्यप्रतिपादकत्वाभावेपि लक्षणया संबंधत्रयेणाखंडैकार्थं प्रतिपादयंतीत्याह । इदमिति । संबंधत्रयस्वरूपमाह । संबंधत्रयमिति । पदपदार्थप्रत्यगात्मनांसंबंधत्रयसद्भावे वृद्धसंमतिमाह।यदुक्तमिति।

(भा०टी०) अब महावाक्यके अर्थका विचार करते हैं —"तत्त्वमसि" यह वाक्य तीन प्रकारके सम्बन्धोंके द्वारा अखंड ब्रह्म चैतन्यका बोधक होता है सम्बन्ध त्रय कहाते हैं—पहला सामानाधिकरण्य,दूसरा विशेष्यविशेषणभाव, तीसरा लक्ष्यलक्षणभाव, "तत्" और "त्वम्" इनदोनों पदोंकी एक अधिकरणमें अवस्थिति होनेपर सामानाधिकरण्य सम्बन्ध होता है दोनों पदोंका परस्पर विशेष्यविशेषण रूप सम्बन्धको विशेष्यविशेषणभाव कहतेहैं । और प्रत्यगा-

त्मा लक्ष्य और दोनों पद लक्षण इस प्रकारके सम्बन्धको लक्ष्यलक्षणभाव सम्बन्ध कहते हैं ग्रन्थान्तरमें कहा भी है--"सामानाधिकरण्य, विशेष्यविशेषणभाव, और लक्ष्यलक्षण भाव, यह तीन प्रकारका सम्बन्ध है" ॥ ७५ ॥

सामानाधिकरण्यसम्बन्धस्तावत् यथा सोऽयं देवदत्त इति वाक्ये तत्कालविशिष्टदेवदत्तवाचकशब्दस्य एतत्कालविशिष्टवाचकायंशब्दस्य च एकस्मिन्देवदत्तपिण्डे तात्पर्य्यसम्बन्धः । तथा च "तत्त्वमसि" वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतच्छब्दस्या-परोक्षत्वादि विशिष्ट—चैतन्यवाचक—त्वंपदस्य चैकस्मिन् चैतन्ये तात्पर्य्यसम्बन्धः ॥ ७६ ॥

(सं०टी०) पदयोः सामानाधिकरण्यं उदाहरणनिष्ठं कृत्वा प्रदर्शयति । सामानाधिकरण्यमिति । भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे प्रवृत्तिः सामानाधिरण्यं तत्र सोयं देवदत्त इति वाक्ये स इति तत्कालतद्देशवैशिष्टयं स शब्दस्य प्रवृत्तिनिमितं अयमिति एतत्कालैतद्देशवैशिष्टचमयंशब्दस्य प्रवृत्तिनिमित्तं यथा च भिन्नप्रवृत्तिनिमित्तयोः सोयं शब्दयोरेकास्मिन् देवदत्तपिंडे तात्पर्य संबंधःसामानाधिकरण्यमित्यर्थः।उक्तमर्थं दार्ष्टांतिके योजयति।तथाचेति। तथा तत्त्वमसीति वाक्येपि परोक्षत्वसर्वज्ञत्वादिवैशिष्टचं तत्पदप्रवृत्तिनिमित्तं अपरोक्षत्वकिंचिज्ज्ञत्वादिवैशिष्टयं त्वंपदप्रवृत्तिनिमित्तं

तथा च भिन्नप्रवृत्तिनिमित्तयोः तत्त्वंपदयोरेकस्मिंश्चैतन्ये तात्पर्यं संबंधः सामानाधिकरण्यमित्यर्थः ॥ ७६ ॥

(भा०टी०) अब सामानाधिकरण्य सम्बन्ध दिखलाते हैं। जैसे "सोऽयं देवदत्तः" इसवाक्यमें "सः" शब्दसे पहले देखीहुई वस्तुका बोध होताहै और "अयम्" शब्दसे वर्त्तमान दृष्ट वस्तुका बोध होता है और दोनों शब्दार्थोंका एक देवदत्त व्यक्तिमें बोध होता है। इसी प्रकार "तत्त्वमसि" इस वाक्यमें भी अप्रत्यक्ष चैतन्यका बोधक "तत्" शब्द है और प्रत्यक्ष चैतन्यका बोधक "त्वम्" शब्द है इनदोनों शब्दार्थोंका एक चैतन्यमय ब्रह्ममें तात्पर्य है। यही सामानाधिकरण्य सम्बधहै।

विशेषणविशेष्यभावसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायं–शब्दार्थं तत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः। तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्था परोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः ॥ ७७ ॥

(सं०टी०) विशेषणविशेष्यभावसंबधस्वरूपमाह। विशेषणेति। व्यावर्तकं विशेषणं व्यावर्त्यं विशेष्यम्। तथा च "सोयं देवदत्तः" इति वाक्ये एवायंशब्दवाच्यो योसावेतत्कालै तद्देशसंबंधविशिष्टो देवदत्तपिंडः अयं स इति तच्छब्दवाच्या- त्तत्कालतद्देशविशिष्टदेवदत्तपिंडाद्भिन्नो नेति यदा प्रतीयते त-

दा तच्छब्दार्थस्यायंशब्दवाच्यार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं अयंशब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वं यदा च स इति तच्छब्दवाच्यः तत्कालतद्देशविशिष्टो देवदत्तपिंडः स अयमितीदंशब्दवाच्यादेतत्कालैतद्देशसंबंधविशिष्टादस्माद्देवदत्तपिंडान्न भिद्यत इति यदा प्रतिपद्यते तदायंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वं तच्छब्दार्थस्य व्यावर्तकत्वाद्विशेष्यत्वं तथा चायमेव सः स एवायमिति अन्योन्यभेदव्यावर्तकतया सोऽयंशब्दार्थयोः परस्परविशेषणविशेष्यभाव इत्यर्थः।उक्तं विशेषणविशेष्यभावं दार्ष्टांतिके योजयति। तथात्रापीति । इहापि तत्त्वमसीति वाक्येपि त्वंपदवाच्यं यदपरोक्षत्वं किंचिज्ज्ञत्वादिविशिष्टं तत्पदवाच्यात्सर्वज्ञत्वादिविशिष्टचैन्यान्न भिद्यते इति यदा प्रतीयते तदा तच्छब्दार्थस्य त्वंपदार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं त्वंपदार्थस्य व्यावृत्यत्वात् विशेष्यत्वं यदा च तत्पदवाच्ययत्सर्वज्ञत्वादिविशिष्टचैतन्यं त्वंपदवाच्यात्किंचिज्ज्ञत्वादिविशिष्टचैतन्यान्न भिद्यत इति यदा प्रतीयते तदा त्वंपदार्थस्य तत्पदार्थनिष्ठभेदव्यावर्तकत्वेन विशेषणत्वं तत्पदार्थस्य व्यावृत्यत्वात् विशेष्यत्वं तथा च त्वं तदसि तत्त्वमसीति तत्त्वंपदार्थयोः परस्परं भेदव्यावर्तकत्वेन परस्परं विशेषणविशेष्यभाव इत्यर्थः॥ ७७॥

(भा०टी०) अब विशेष्यविशेषणभाव सम्बन्ध दिखलाते हैं। जैसे—पहले कहे हुए "सोऽयं देवदत्तः" इस वाक्यमें "सः" पदका अर्थ पहले देखी हुई व्यक्तिका बो-

धक होताहै और "अयम्" पद का अर्थ वर्त्तमान काल में दृष्टिगोचर वस्तुका बोधक होता है और इन दोनोंपदोंके अर्थोंका परस्पर विशेष्यविशेषणरूप सम्बन्ध है क्योंकि एकही व्यक्तिमें दोनों पदोंके अर्थोंका तात्पर्य्य अभिन्नरूपसे मालूम होता है। तिसी प्रकार "तत्त्वमसि" इस वाक्यमें भी "तत्" पदका अर्थ अप्रत्यक्ष चैतन्य और "त्वम्" पदका अर्थ प्रत्यक्ष चैतन्य है इन दोनों पदोंके अर्थोंका परस्पर विशेष्यविशेषणभाव सम्बन्ध है क्योंकि दोनों पदोंके अर्थों का एक वस्तु में अभिन्न रूप से तात्पर्य्य मालूम होता है ॥ ७७ ॥

लक्ष्यलक्षणभावसम्बन्धस्तु यथा तत्रैव सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेन अविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः। तथात्रापि वाक्ये तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः। इयमेव भागलक्षणेत्युच्यते ॥ ७८ ॥

(सं०टी०) क्रमप्राप्तं लक्ष्यलक्षणभावसंबंधस्वरूपं निरूपयितुमाह। लक्ष्यलक्षणेति। असाधारणधर्मप्रतिपादकं वाक्यं लक्षणवाक्यं तत्प्रतिपाद्यमवशिष्टं वस्तु लक्ष्यं तथाच सोयं देवदत्त इत्यस्मिन्नेव वाक्ये सोऽयंशब्दयोः तदर्थयोर्वा विरुद्धतत्कालतद्देशएतत्कालैतद्देशविशिष्टत्वपरिहारेणाविरुद्धदेवदत्तपिंडेन सह लक्ष्यलक्षणभावसंबंध इत्यर्थः। उक्तमर्थं दा-

ष्टांतिके योजयति । तथात्रापीति । इहापि तत्त्वंपदयोस्तदर्थ-योर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेन तत्त्वं-पदाभ्यां तदर्थाभ्यां वा लक्ष्याऽविरुद्धचैतन्येन सह तत्त्वंपदयो-र्लक्ष्यलक्षणभावसंबंध इत्यर्थः।अत्र तत्त्वंपदयोः तदर्थयोश्च त्य-क्तविरुद्धांशयोर्लक्षणत्वं अखंडचैतन्यस्य लक्ष्यत्वमिति भा-वः। ननु तत्त्वमस्यादिवाक्यानां लक्ष्यलक्षणभावसंबंधपुरस्का-रेण चैतन्यबोधकत्वमित्युक्तम् अन्यत्र तु शास्त्रे तेषां वा-क्यानां भागलक्षणयैव चैतन्यबोधकत्वं प्रतिपाद्यते तत्त्व-मस्यादिवाक्येषु लक्षणाभागलक्षणेत्यादिविरोधमाशंक्य संज्ञा-भेदो न वस्तुभेद इत्याह । इयमेवेति । तत्त्वमस्यादिवाक्यानां विरुद्धांशपरित्यागेनाविरुद्धचैतन्यमात्रबोधकत्वमेव भागलक्ष-णेत्युच्यत इत्यर्थः ॥ ७८ ॥

(भा०टी०) अब लक्ष्यलक्षणभाव सम्बन्ध दिखलाते हैं– जैसे पहले कहेहुये "सोऽयं देवदत्तः" इसवाक्यमें "सः" पदका अर्थ पूर्वकालमें दृष्टत्व है और "अयम्" पदका अर्थ वर्त्तमानकालमें दृष्टत्व है इन परस्पर विरुद्ध दोनों अर्थोंका त्याग करके केवल एक देवदत्त व्यक्ति ही लक्ष्य होता है और "सः अयम्" ये दोनों पद लक्षण होते हैं इसकारण लक्ष्य लक्षणभाव सम्बन्ध है । तिसीप्रकार "तत्त्वमसि" इस वक्य में भी "तत्" पद का अर्थ अप्रत्यक्षत्व और "त्वम्" पदका अर्थ प्रत्यक्षत्व है । इन परस्पर विरुद्ध दोनों अर्थों का त्याग करके केवल एक अविरुद्ध चैतन्य लक्ष्य होता है

और "तत्-त्वम्" पद लक्षण होते हैं इसीको शास्त्रकार भागलक्षणा सम्बन्ध कहते हैं ॥ ७८ ॥

अस्मिन् वाक्ये नीलमुत्पलमिति वाक्यवद्वाक्यार्थो न सङ्गच्छते। तत्र नीलपदार्थनीलगुणस्य उत्पलपदार्थोत्पलद्रव्यस्य च शुक्लपदादिव्यावर्त्तकतयाऽन्योन्यविशेष्यविशेषणरूपसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य वा तदैक्यस्य वाक्यार्थत्वाङ्गीकरणे प्रमाणान्तरविरोधाभावाद्वाक्यार्थः सङ्गच्छते। अत्र तु तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वम्पदार्था परोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावसंसर्गस्य अन्यतरविशिष्टस्यान्यतरस्य वा तदैक्यस्य वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न सङ्गच्छते ॥ ७९ ॥

(सं०टी०) ननु यथा नीलोत्पलमिति वाक्ये नीलत्वविशिष्टनीलगुणस्य उत्पलत्वविशिष्टोत्पलद्रव्यस्य च स्वव्यतिरिक्तशुक्लादिगुणांतरपटादिद्रव्यांतरव्यावर्त्तकत्वेन विशेषणविशेष्यभावनिरूपिततद्भिन्नसंसर्गस्य नीलगुणवैशिष्ट्यस्य वा वाक्यार्थत्वं तथेहापि तत्त्वमस्यादिवाक्ये तत्पदार्थस्य परोक्षत्वादिविशिष्टेश्वरचैतन्यस्य त्वंपदार्थस्यापरोक्षत्वादिविशिष्टजीवचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभूतसर्वज्ञत्वकिंचिज्ज्ञत्वोभयनिरूपितसंसर्गो वा सर्वज्ञत्वादिविशिष्टस्य

किंचिज्ज्ञत्वादिविशिष्टेन सहैक्यं वा वाक्यार्थो भवत्वित्याशंक्य दृष्टांतदार्ष्टांतिकयोः वैषम्यान्नैवमित्याह अस्मिन्नित्यादिना । अस्मिन्निति । अस्मिंस्तत्त्वमसीति वाक्ये नीलोत्पलमित्यादिवाक्यवत्संसर्गो वा विशिष्टो वा वाक्यार्थेन संगच्छत इत्यर्थः। नीलोत्पलमितिवाक्यस्य संसर्गवैशिष्ट्यार्थप्रतिपादकत्वकल्पने विरोधाभावो दर्शयति । तत्र त्विति। नीलोत्पलपदार्थयोर्गुणगुणिनोर्विशेषणविशेष्यभावसंसर्गस्य नीलगुणविशिष्टोत्पलयोरैक्यस्य वा वाक्यार्थत्वांगीरकारे प्रत्यक्षादिप्रमाणांतरविरोधाभावात्तत्र तथा संगच्छत इति भावः । तत्त्वमसीति वाक्ये तु तत्त्वंपदार्थयोःकिंचिज्ज्ञत्वादिविशिष्टजीवचैतन्यस्य सर्वज्ञत्वादिविशिष्टेश्वरचैतन्यस्य चान्योन्यविशेषणविशेष्यभावसंसर्गस्य तदुभयविशिष्टचैतन्यैक्यस्य वा वाक्यार्थत्वांगीकारे प्रत्यक्षादिप्रमाणांतरविरोधात्पूर्वस्माद्वैषम्यं दर्शयति । अत्र त्विति ॥ ७९ ॥

(भा०टी०) "नीलमुत्पलम्" इस वाक्यसे जैसा वाक्यार्थ होता है । तिस प्रकार "तत्त्वमसि" इस वाक्यका वाक्यार्थ सङ्गत नहीं होता है क्यों कि "नीलमुत्पलम्" इस वाक्य में नील पदका अर्थ नीलगुण है और उत्पल पदका अर्थ उत्पल द्रव्य है यह दोनों शुक्लत्वादि और गुण और घटपटादिद्रव्यके व्यावर्त्तक हैं इस कारण परस्पर विशेष्यविशेषणभाव सम्बन्ध अथवा एक की दूसरे सङ्ग वाक्यार्थ सङ्गति होती है- तिस प्रकार "तत्त्वमसि" इस वाक्यमें सर्वज्ञत्व और किञ्चिज्ज्ञ-

त्व में प्रत्यक्षादि प्रमाणका विरोध होनेसे "नीलमुत्पलम्" इसके वाक्यार्थकी तरह "तत्त्वमसि" इसका वाक्यार्थ सङ्गत नहीं होता है ॥ ७९ ॥

अत्र तु गङ्गायां घोषः प्रतिवसतीतिवज्जहल्लक्षणा न सङ्गच्छते। तत्र तु गङ्गाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाच्यार्थमशेषतः परित्यज्य तत्सम्बन्धितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा सङ्गच्छते। अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वरूपस्य वाक्यार्थस्य भागमात्रे विरोधाद्भागान्तरमपरित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्षणा न सङ्गच्छते ॥८०॥

(सं०टी०) ननु तत्त्वमस्यादिवाक्यमखंडार्थं कथं बोधयति जहल्लक्षणया वा किमजहल्लक्षणया आहोस्विज्जहदजहल्लक्षणयेति त्रिधा विकल्पः। आद्ये दूषणमाह। अत्र त्विति। तत्त्वमसीतिवाक्ये जहल्लक्षणा न संगच्छत इत्यन्वयः। तदेव दर्शयितुं जहल्लक्षणाया उदाहरणं तावदाह। गंगायामिति। मानान्तरविरोधे तु मुख्यार्थस्यापरिग्रहे 'मुख्यार्थेनाविनाभूते प्रवृत्तिर्लक्षणेष्यते' इति वचनाद्गंगायां घोषवत्त्वासंभवाद्गंगायां घोष इति वाक्यस्य मुख्यार्थविरोधे सति मुख्यार्थं परित्यज्य लक्षणया वृत्त्या तत्संबंधिनि तीरे घोषावस्थानप्रतिपादनात्तत्र जहल्लक्षणांगीकारो युज्यत इत्याह। तत्र त्विति। तत्र तु गंगाघोषयोराधाराधेयभावलक्षणां सर्वथा प-

रित्यज्येत्यर्थः । तत्त्वमसीति वाक्ये प्राक्प्रतिज्ञातं जहल्लक्षणा-संभवमाविष्करोति । अत्र त्विति । तु शब्दः पूर्वस्माद्वैषम्यं द्योतयति। तत्त्वमसीति वाक्ये परोक्षत्वापरोक्षत्वविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य विरोधाभावात्परोक्षत्वापरोक्षत्व-प्रतिपादकत्वांशे विरोधाच्चैतन्यैकत्वे विरोधाभावाद्गंगाघो-षादिवाक्यवत्सर्वात्मना मुख्यार्थपरित्यागासंभवाज्जहल्लक्षणा न संभवतीत्यर्थः । तत्र हेतुमाह । भागांतरमिति । विरुद्ध-योः परोक्षत्वापरोक्षत्वयोरेकत्वासंभवेन तत्परित्यागेपि चैत-न्यभागस्यैकत्वे विरोधाभावात् त्यागो न युज्यत इत्यर्थः ८०

(भा०टी०) जैसे "गङ्गायां घोषः प्रतिवसति" इस वाक्यमें जहत्स्वार्थलक्षणा वृत्तिसे वक्यार्थ सङ्गत होता है। तिस प्रकार "तत्त्वमसि" इस वाक्यका जहत्स्वार्थल-क्षणा द्वारा वाक्यार्थ सङ्गत नही होता है क्योंकि "गङ्गायां घोषः प्रतिवसति" इस वाक्यमें भगीरथरथखातावच्छिन्न जलप्रवाहरूप गङ्गा और घोष (आभीरपल्ली) इनका आ-धाराधेयभाव असम्भव होनेसे वाक्यार्थ बाधित होता है। इस कारण विरोध दूर करनेके अर्थ तात्पर्यकी अनुपपत्ति होनेसे गङ्गा पदका शक्यार्थ जो भगीरथरथखातावच्छिन्न जल प्रवाह उसका परित्याग करके लक्षणाद्वारा गङ्गाके समीप वर्ति गङ्गातीरमें गङ्गापदका अर्थ युक्तिद्वारा कल्पना किया जाताहै। इस प्रकार शब्दका मुख्य अर्थ परित्याग करके अन्य अर्थका स्वीकार करना। लक्षणा अर्थात् जहत्स्वार्थलक्षणा

होतीहै। तिस प्रकार "तत्त्वमसि" इस वाक्यमें प्रत्यक्ष और अप्रत्यक्ष इन दोनोंके ऐक्य स्वरूप वाक्यार्थमें कोई विरोध नहींहै केवल प्रत्यक्ष और अप्रत्यक्ष को प्रतिपादक अंश विरोध है। सो शक्यार्थको परित्याग करके लक्ष्यार्थ स्वीकार नहीं करतेहैं। इसी कारण "तत्त्वमसि" इस वाक्यमें अजहत्स्वार्थलक्षणा सङ्गत नहीं होतीहै ॥ ८० ॥

न च गङ्गापदं स्वार्थपरित्यागेन तीर्थपदार्थं यथा-लक्षयति तथा तत्पदं त्वंपदं वा वाच्यार्थपरित्यागेन त्वंपदार्थं तत्पदार्थं वा बोधयतु तत् कुतोऽजहल्लक्षणा न सङ्गच्छते इति वाच्यम्। तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनः अन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात्। श्रुतवाक्यस्य मुख्यार्थविरोधे मुख्यार्थसम्बधिन्यश्रुतपदार्थे लक्षणेतिसर्वजनप्रसिद्धम् ॥ ८१ ॥

(सं०टी०) ननु यथा गंगायां घोषः प्रतिवसतीति वाक्ये गंगापदं प्रवाहलक्षणस्वार्थं परित्यज्य स्वसंबंधिनीरपदार्थं लक्षयति। तथा। तत्त्वमसीति वाक्ये तत्पदं स्वार्थं परोक्षत्वविशिष्टं परित्यज्य जीवचैतन्यं लक्षयतु एवं त्वंपदमपि स्वार्थं किंचिज्ज्ञत्वादिविशिष्टं परित्यज्येश्वरचैतन्यं वा लक्षयतु तस्माज्जहल्लक्षणैव भवतीत्याशंक्य निराकरोति। नचेति। नि

राकरणप्रकारमेवाह । तत्रेति । तथा च गंगायां घोष इत्यत्र श्रुतवाक्यार्थस्य गंगाघोषयोराधाराधेयभावसंबंधस्य विरोधे सति श्रूयमाणं गंगापदं स्वार्थपरित्यागेन तीरपदार्थं लक्षयतीति युक्तं गंगापदार्थस्य तीरपदार्थप्रतीतिसापेक्षत्वादिहेतुश्रूयमाण-तत्त्वंपदयोर्मुख्यतयैव तदर्थसर्वज्ञत्वकिंचिज्ज्ञत्वादिविशिष्टप्रतीतौ सत्यामपि लक्षणया तत्पदेन त्वंपदार्थप्रतीत्यपेक्षाभावात्त्वंपदेन तत्पदार्थप्रतीत्यपेक्षाभावाच्च मुख्यार्थे संभवति लक्षणाया अन्याय्यत्वाज्जहल्लक्षणा न संभवतीत्यर्थः ॥ ८१ ॥

(भा०टी०) जैसे गङ्गापदका वाच्यार्थ परित्यागकरके लक्षणाद्वारा तीर अर्थ ग्रहण किया जाताहै तिसी प्रकार लक्षणाद्वारा तत्पदका वाच्यार्थ परित्याग करके त्वं पदार्थमें अथवा त्वंपदका शक्यार्थ परित्याग करके तत्पदार्थमें लक्षित होजाय । तब तो "तत्त्वमसि" वाक्यमें भी जहत्स्वार्थ लक्षणा सङ्गत होजायगी । सो ठीक नहींहै क्योंकि "गङ्गायां घोषः" इस वाक्यमें तीरशब्दका उच्चारण नहींहै इसकारण तीर अर्थ की अपेक्षा करके जहत्स्वार्थलक्षणा सङ्गत होती है। परन्तु "तत्त्वमसि" इस वाक्यमें "तत्" और "त्वम्" यह दोनों पदार्थ युक्त हैं और दोनोंके अर्थ प्रसिद्ध हैं इस कारण यहां लक्षणाद्वारा अन्य पदको अन्यतर अर्थकी आवश्यकता नहीं है इस कारण "तत्त्वमसि" वाक्यमें जहत्स्वार्थलक्षणा असङ्गत होती है कारण कि, जो कोई वाक्य सुना जाताहै, उस वाक्यका मुख्य अर्थ समझनेमें वि-

रोध आवे, तौ वहां उस मुख्य अर्थके संबंधी, नहीं सुने हुए पदार्थमें उस मुख्य अर्थकी लक्षणा करना, यह बात तौ सर्व लोकों में प्रसिद्ध हैं ॥ ८१ ॥

अत्र शोणो धावतीति वाक्यवदजहल्लक्षणापि न सङ्गच्छते। तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणायां तद्विरोधपरिहारसम्भवादजहल्लक्षणा सम्भवति अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्सम्बन्धिनो यस्य कस्य चिदर्थस्य लक्षितत्वेऽपि तद्विरोधाऽपरित्यागादजहल्लक्षणापि न सम्भवत्येव ॥ ८२ ॥

(सं०टी०) द्वितीयं पक्षं दूषयतिअजलहल्लक्षणापि न संभवतीत्याह। अत्र शोणो धावतीति। अत्र तत्त्वमसीतिवाक्ये शोणो धावतीति वाक्यवत् अजहल्लक्षणापि न संभवतीत्यन्वयः। कुत इत्यत आह। तत्रेति। तत्र शोणो धावतीत्यादिवाक्ये शोणगुणस्य गमनासंभवेन वाक्यस्य मुख्यार्थविरोधे सति श्रूयमाणशोणपदं स्वार्थापरित्यागेन स्वाश्रयमश्वादिकं लक्षयतीति युक्तम्। अत्र त्विति। अत्र तत्त्वमस्यादिवाक्ये तत्त्वंपदार्थस्य परोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य मुख्यवाक्यार्थस्य विरुद्धत्वात्परोक्षत्वापरोक्षत्वाद्यपरित्यागेन तत्त-

द्विशिष्टचैतन्यलक्षणार्थस्य लक्षितत्वेपि तद्विरोधपरिहाराभावादजहल्लक्षणा न संभवतीत्यर्थः ॥ ८२ ॥

(भा०टी०) और "शोणो धावति" इस वाक्यमें जिस प्रकार अजहत्स्वार्थ लक्षणा सङ्गत होती है तिसप्रकार "तत्त्वमसि" वाक्य में अजहत्स्वार्थलक्षणा भी सङ्गत नहीं है। क्योंकि "शोणो धावति" इसवाक्यमें शोण (लालरङ्ग) गुणकी गमनक्रिया बाधित है इस कारण शोणपद शक्यार्थ को विना परित्याग करके अर्थात् रक्तिम अर्थसहित लक्षणाद्वारा शोणगुणविशिष्ट अश्वादिकमें लक्षित होता है तब गमनक्रियाका विरोध नहीं होता है इसी कारण "शोणो धावति" इस वाक्यमें अजहत्स्वार्थलक्षणा सङ्गत होती है। परन्तु "तत्त्वमसि" इस वाक्य में प्रत्यक्ष और अप्रत्यक्ष चैतन्य के प्रत्यक्ष रूप वाक्यार्थमें प्रत्यक्ष और अप्रत्यक्षके प्रतिपादक अंशको विरोधके कारण विरुद्ध अंशका विना परित्याग करे लक्षणा द्वारा उसका सम्बन्धि जो कोई अर्थ लक्षित होकर विरोध दूर नहीं होता है इसकारण अजहत्स्वार्थलक्षणा असङ्गत है ॥ ८२ ॥

न च तत्पदं त्वम्पदं वा स्वार्थविरुद्धांशपरित्यागेनांशान्तरसहितं तत्पदार्थं त्वंपदार्थं वा लक्षयतु। अतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणमिति वाच्यम्। एकेन पदेन स्वार्थांशपदार्थान्तरोभयलक्षणाया असम्भवात् पदान्तरेण तदर्थप्रती-

तौ लक्षणया पुनरन्यतरपदार्थप्रतीत्यपेक्षाभा-
वाच्च ॥ ८३ ॥

(सं०टी०) ननु तत्पदं स्वार्थे विरुद्धपरोक्षत्वादिधर्मं परित्यज्याविरुद्धचैतन्यांशापरित्यागेन त्वंपदार्थं किंचिज्ज्ञ-त्वादिविशिष्टं जीवचैतन्यं लक्षयतु त्वंपदं वा स्वार्थविरुद्धापरो-क्षत्वादिधर्मं परित्यज्याविरुद्धचैतन्यांशापरित्यागेन तत्पदार्थं सर्वज्ञत्वादिविशिष्टमीश्वरचैतन्यं लक्ष्यतु किं भागलक्षणांगी-कारेणेत्याशंक्य निराकरोति । नचेति । एकेन तत्पदेन त्वंपदेन वा स्वार्थांशपरित्यागपदार्थांतरस्वीकारोभयलक्षणा-संभवादित्यर्थः । अजहल्लक्षणासंभवे हेत्वंतरमाह । पदांतरेणे-ति।तत्पदेन त्वंपदेन वा तत्तदर्थप्रतीतौ सत्यां लक्षणया पुनर-न्यतरस्यान्यतरप्रतीत्यपेक्षाभावादित्यर्थः । अतः परि-शेषात् ॥ ८३ ॥

(भा०टी०) और यह भी नहीं कहसक्के कि "तत्"वा "त्वम्" पदार्थका स्वस्वविरुद्ध अर्थांश परित्याग करके अ-विरुद्ध अर्थके सहित "तत्" वा "त्वम्" पदका अर्थ लक्षित होकर भागलक्षणा का स्वीकार करता भी निष्फल है। क्योंकि एक पदके द्वारा स्वीय अविरुद्ध अंशका परित्याग और अन्य पदार्थ इन दोनों अर्थका लक्षणासे होना असम्भ-वहै। तथा अन्य पदद्वारा जो अर्थ प्रतीत होता है लक्षणा-द्वारा। दूसराके उससे अन्य पदार्थ का बोध नहीं होसक्ता ८३

तस्माद्यथा सोऽयं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाच्यार्थस्यांशविरोधात् । विरुद्धतत्कालैतत्कालविशिष्टत्वांशंपरित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति । तथातत्त्वमसीति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाच्यार्थस्यांशविरोधाद्विरुद्धपरोक्षत्वापरोक्षत्वा विशिष्टां दिशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयति ॥ ८४ ॥

(सं०टी०) तृतीयपक्ष एव चांगीकर्तव्य इत्युपसंहरति । तस्मादिति । यस्मात्तत्त्वमस्यादिवाक्ये जहल्लक्षणाऽजहल्लक्षणयोरसंभवः तस्माज्जहदजहल्लक्षणया विरुद्धांशं परित्यज्याविरुद्धाखंडचैतन्यमात्रं लक्षयतीति योजना । तत्र दृष्टांतमाह । यथेति । यथा सोयं देवदत्त इति वाक्ये प्रागुक्तजहल्लक्षणाजहल्लक्षणयोरसंभवेन तदर्थस्य तत्कालतद्देशाविशिष्टस्य इदमर्थस्यैतत्कालैतद्देशविशिष्टदेवदत्तलक्षणवाक्यार्थस्यैकस्मिन्नंशे तत्काले तत्कालवैशिष्टयभागे विरोधदर्शनात्तत्परित्यागेनाविरुद्धदेवदत्तपिंडमात्रं लक्षयतीत्यर्थे न मानांतरविरोध इत्युक्तन्यायेनेत्यर्थः । उक्तमर्थं दार्ष्टांतिके योजयति । तथेति । तत्त्वमसीत्यादिवाक्यस्यापि परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणमुख्यार्थप्रतिपादकत्वासंभवाज्जहदजहल्लक्षणया

विरुद्धपरोक्षत्वादिवैशिष्ट्यांशपरित्यागेनाविरुद्धाखण्डचैतन्य-मात्रप्रतिपादकत्वं तस्येत्यर्थः ॥ ८४ ॥

(भा०टी०) जैसे "सोऽयं देवदत्तः" इस वाक्यमें पूर्व कालमें देखाहुआ और वर्त्तमानकालमें देखाहुआ जो देवदत्त-रूप वाच्यार्थ उसका एक अंशमें विरोध होनेसे विरुद्ध अंश जो पूर्व काल है उसमें और वर्तमान काल में है उसका परित्याग करके देवदत्त रूप अंश लक्ष्यार्थ होताहै। तिसी प्रकार "तत्त्वमसि" इस वाक्यमें प्रत्यक्ष और अप्रत्यक्ष चैतन्य का ऐक्यरूप जो वाच्यार्थ है उसके एकांशमें विरोध होनेसे विरुद्ध अंश प्रत्यक्षत्व और अप्रत्यक्षत्व उसका परित्याग करके अविरुद्ध अखण्ड चैतन्यांशमात्र लक्ष्यार्थहोताहै॥ ८४ ॥

अथाधुना अहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते। एवमाचार्य्येणाध्यारोपापवादपुरःसरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्य-शुद्ध-बुद्ध-मुक्त-सत्य-स्वभाव-परमानन्दा-नन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति।सा तु चित्प्रतिबिम्बसहिता-सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधतेतदा पटकारणतन्तुदाहे पटदाहवदखिलकार्य्यकारणेऽज्ञाने बाधिते सति तत्कार्य्यस्याखिलस्य बाधितत्वात् तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति॥८५॥

(सं॰टी॰) अखंडचैतन्यप्रतिपादकस्य तत्त्वमसीतिवाक्यस्यार्थं सप्रपंचमभिधायेदानीं यजुर्वेदानुभववाक्यार्थो वर्ण्यत इत्याह । अथाधुनेति ।गुरुमुखान्नवक्तत्वःतत्त्वमस्यादिवाक्यश्रवणाद्देहाद्यहंकारान्तजडपदार्थसकलदृश्यविलक्षणप्रत्यगात्मनः शुद्धेन परमात्मना सहैकत्वबोधानंतरं कश्चिदधिकारी लब्धावसरं सर्वोपाधिविनिर्मुक्तं सच्चिदानंदैकरसमनुभवेन जिज्ञासुराचा र्योपदिष्टमहं ब्रह्मास्मीति वाक्यार्थमनुस्मरन् स्वात्मानंदैकरसमनुभवतीत्यर्थः। तत्प्रकारमेवाह। एवमित्यादिना ।एवं संक्षेपेण । प्रमाणवक्ष्यमाणप्रकारेणाधिकारिणः चित्तवृत्तिरुदेतीति संबंधः। कदेत्यपेक्षायामाह । आचार्येणेति।आचार्येणाविषयेऽसंगे निष्कलचैतन्ये शशशृंगायमानाऽविद्याहंकारादिशरीरांतं मिथ्यापदार्थमध्यारोप्य तदपवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा तत्त्वमसीतिवाक्येन जहदजहल्लक्षणया विरुद्धांशपरित्यागेनाखंडार्थचैतन्ये ज्ञाते सतीत्यर्थः । किंविषयिणीचित्तवृत्तिरुदेतीत्याशंकां निवारयति । अहमिति । अहं प्रत्यगात्मा परं ब्रह्मास्मीत्यन्वयः । ब्रह्मानित्यत्वशंकां निराकरोति । नित्येति । शुद्धपदेनाऽविद्यादिदोषराहित्यं बुद्धपदेन स्वप्रकाशस्वरूपत्वं मुक्तपदेन सर्वोपाधिराहित्यं सत्यपदेनाविनाशिस्वभावत्वंपरमानंदपदेनवैषयिकमनुष्यानंदादिचतुर्मुखब्रह्मानंदपर्यन्तानांकर्मजन्यत्वेनसातिशयत्वेन क्षयिष्णुत्वेन च तुच्छत्वात्तेभ्यो विलक्षणं निरतिशयानंदस्वरूपत्वं प्रतिपाद्यते अ-

नंतपदेन घटादिवत्परिच्छेदराहित्येन देशतः कालतो वस्तुतश्चा-परिच्छिन्नत्वं बोध्यते। अद्वयमिति। नानात्वनिषेधेन एक-त्वं बोध्यत इत्यर्थः। ननु यथा दीपप्रभादित्यमंडलं न व्या-प्नोति न च प्रयोजनमस्ति तथा नित्यशुद्धस्वप्रकाशमात्मानं जडचित्तवृत्तिरेकं विषयीकृत्योदेति। किं प्रयोजनं चेत्याशं-क्याह। सातिवाति। सा चित्तवृत्तिर्न शुद्धब्रह्मविषयिणी किंत्व-ज्ञानविशिष्टप्रत्यगभिन्नपरब्रह्मविषयिणी सा च चैतन्यप्रतिबिं-बसंवलिता सती चैतन्यगतमज्ञानं निवर्तयति तस्याः चैत-न्यावरका न निवृत्तिरेव प्रयोजनमित्यर्थः। नन्व-धिकारिणः तत्त्वमस्यादिवाक्यश्रवणोत्पन्नाऽखंडचैतन्यवृत्त्या तदाश्रिताज्ञाननिवारितेपि तत्कार्यस्य सकलचराचरात्मकप्र-पंचस्य प्रत्यक्षतया भासमानत्वात्कथमद्वैतसिद्धिरित्याशंक्य कारणाज्ञाननाशे तत्कार्यसकलप्रपंचनाशादद्वैतसिद्धिरित्येत-त्सदृष्टांतमाह। यथेति। नन्वज्ञाननाशे तत्कार्यप्रपंचस्य ना-शोस्तु तथाप्यखंडाकारचित्तवृत्तेरनिवृत्तेरद्वैतहानिरित्याशंक्या-ह। तदंतर्भूतेति। अखंडाकारवृत्तेरपि अज्ञानतत्कार्यान्त-र्भूतत्वाच्चित्तवृत्त्यातन्निवृत्तेर्नाद्वैतहानिरित्यर्थः॥ ८५॥

(भा०टी) अब 'अहं ब्रह्मास्मि' इस अनुभववाक्यका अर्थ लिखतेहैं।आचार्य्य पहले कहे हुए अध्यारोप और अप-वाद न्यायके द्वारा "तत्"और "त्वम्"इन दोनों पदोंके अर्थ का शोधन करके जिस समय "तत्त्वमसि" इस वाक्य द्वारा

अखण्ड चैतन्यका बोध होजायहै उस समय मैं नित्य, शुद्ध, बुद्ध, मुक्त, सत्यस्वरूप, परमानन्द, अद्वितीय, ब्रह्म हूँ इस प्रकार अखण्ड अन्तःकरण वृत्ति होती है वह अन्तःकरण वृत्ति चैतन्यप्रतिबिंबित होती है तब वह चित्तवृत्ति चैतन्य द्वारा प्रकाशित होकर प्रत्यगात्मा (जीव ब्रह्मका अभेद ज्ञान) और अभिन्न परब्रह्म विषयक अज्ञानका नाश करदेतीहै। जैसे वस्त्रके तन्तुका नाश होनेसे वस्त्र नष्ट हो जाताहै तिसी सम्पूर्ण संसारके कारण अज्ञानका नाश होनेसे तदन्तर्गत अखण्डाकार अन्तःकरणकी वृत्तिभी नष्ट हो जातीहै ॥ ८५ ॥

तत्र वृत्तौ प्रतिबिम्बितं चैतन्यमपि यथा प्रदीपप्रभा आदित्यप्रभावभासनसमर्था सती तयाभिभूताभवतितथास्वयंप्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत्स्वोपाधिभूताखण्डवृत्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखत्वमात्रवत्प्रत्यगभिन्नपरब्रह्ममात्रं भवति॥८६॥

(सं०टी०) ननु तथाप्यखंडाकारवृत्तिप्रतिबिंबितचैतन्याभासस्य सत्त्वात्कथमद्वैतसिद्धिरित्याशंक्याह। तत्रेति। वृत्तिनिवृत्तौतत्प्रतिबिंबितचैतन्यस्य बिंबावभासनासमर्थत्वाद्वृत्त्युपाधिबाधेन तत्प्रतिबिंबचैतन्यमपि चैतन्यमात्रतयावशिष्यते दर्पणोपाधिविगमे तत्प्रतिबिंबितमुखाभासस्य बिंबीभूतमुखमात्रतावशेषवदित्यर्थः। अयंभावः। शोधिततत्त्वंपदार्थस्याधिकारिणः तद्विजृंभितगुरुशास्त्रादिभ्यः तत्त्वमसीत्युप-

देशेन अहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदानंताद्वयाखंडं ब्रह्मास्मीति चित्तवृत्तिरुदयमासादयति तदानीमेवतस्यामभिव्यक्ताखंडचैतन्यबलेन तत्परिपीडिताज्ञाननाशो भवति तदानीं तत्कार्यस्य सर्वस्य नाशादभिव्यंजकवृत्तिरपि स्वयमेव कनकरजोवद्दारुमथनजनिताग्निवदुदरस्थदुष्टजलशांत्यर्थं पीततप्तजलवच्च नष्टा भवति तदानीं तद्गताभासोपि स्वोपाधिभूतवृत्ति नाशात्स्वप्रकाशात्मावभासमानासमर्थतया दर्पणविगमे तदुपाधिकस्य स्वाधिष्ठानमुखमात्रत्ववदधिष्ठानमात्रो भवतीति वदान्तसिद्धांतरहस्यमिति। अत्र तस्यानुभवः । "लोकाश्च भांतिपरमेमयिमोहजन्याः स्वप्नेंद्रजालमरुनीरसमाविचित्राः॥ व्युत्थानकालइह न स्युरलं विशुद्धप्रत्यङ्मुखाब्धिपरमामृताचित्तवृत्तौ ॥ १ ॥ मत्तः परं न खलु विश्वमथापि भाति मध्ये च पूर्वमपरं नरशृंगतुल्यम् । मायोत्थशास्त्रगुरुवाक्यसमुत्थबोधभानुप्रभा विलसते क्व गतं न जाने ॥ २ ॥ निरतिशयसुखाब्धौ स्वप्रकाशे परेस्मिन् कथमिदमविवेकादुत्थितं स्रक्फणीव ॥ क्व नु गतमधुना तद्देशिको वा श्रुतिर्वा परमविमलबोधेऽभ्युत्थितेहं न जाने ॥ ३ ॥" तदेतत्सर्वं मनसि निधायोपसंहरति । प्रत्यगभिन्नेति ॥ ८६ ॥

(भा०टी०) जैसे दीपक की प्रभा सूर्य्यकी प्रभाके प्रकाश होनेपर असमर्थ होकर अपने आप निष्प्रभ होजातीहै तिसी प्रकार अन्तःकरण वृत्तिमें प्रतिबिम्बित चैतन्य स्वप्रकाश स्वरूप ब्रह्म चैतन्यके प्रकाश करनेको समर्थ नहीं होताहै और

स्वप्रकाश ब्रह्म चैतन्यसे स्वयं अभिभूत होजाताहै। और जैसे दर्पणके न होनेपर मुखप्रतिबिम्ब मुखही रहता है तिसी प्रकार उपाधिभूतअन्तःकरणवृत्तिके न होनेपर स्वप्रकाश परब्रह्म मात्रही रहताहै इस प्रकार ज्ञानियोंको "मैं ब्रह्म हूँ" इस प्रकार अनुभव होताहै ॥ ८६ ॥

एवञ्च सति "मनसैवानुद्रष्टव्यं। यन्मनसा न मनुते" इत्यनयोः श्रुत्योरविरोधः। वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात्। उक्तञ्च— "फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतं। ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता" ॥ इति। स्वयंप्रकाशमानत्वान्नाभासउपयुज्यतइति ॥ ८७ ॥

(सं०टी०) ननु "मनसैवानुद्रष्टव्यं मनसैवेदमवाप्तव्यं दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मयासूक्ष्मदर्शिभिः।बुद्ध्यवलोकनसाध्येस्मिन्वस्तुन्यस्तामिता यदि।बुद्धियोगमुपाश्रित्यमच्चित्तःसततं भव"इत्यादिश्रुतिस्मृतीनां "यतोवाचोनिवर्तन्ते। अप्राप्यमनसासह। यन्मनसा न मनुते अन्यदेव तद्विदितादथोऽविदितादधीह्रि। अविज्ञातं विजानतां विज्ञातमविजानतां। अनाशिनोप्रमेयस्य। यद्विज्ञातं त्वया विप्रयन्नविज्ञातमात्मना। ताभ्यामन्यत्परंविद्धि यद्वेद्यंतज्जडम्"इत्यादि श्रुतिस्मृतीनांपरस्परविरोधमाशंक्य परिहरति। एवमिति। एवमुक्तप्रकारेण अज्ञातचैतन्यस्य वृत्तिव्याप्यत्वांगीकारेण फलव्याप्यत्वे प्रतिसिद्धे सतीत्यर्थः। तदेवाह वृत्तिव्याप्यत्वेति। अंतःकरणवृ-

त्तिरावरणनिवृत्त्यर्थमज्ञानावच्छिन्नं चैतन्यं व्याप्नोतीत्येतद्वृत्तिव्याप्यत्वमंगीक्रियते आवरणभंगानंतरंस्वयं प्रकाशमानं चैतन्यं फलचैतन्यमित्युच्यते तस्मिन्फलचैतन्ये निष्फल काचिद्वृत्तिर्न व्याप्नोति आवरणभंगस्य प्रागेव ज्ञातत्वेन प्रयोजनाभावादित्यर्थः। अस्मिन् ग्रन्थे ग्रंथांतरं संवादयति। तदुक्तमिति। वृत्तिप्रतिबिंबितचैतन्याभासस्यापि फलचैतन्यप्रकाशकत्वं नेत्यत्रापि संमतिमाह। स्वयमिति ॥ ८७ ॥

(भा०टी०) पूर्वोक्त अनुभव प्रकार सिद्ध होनेपर "ब्रह्म मन करकै धारण किया जाता है। ब्रह्म मनसे धारण नहीं किया जाताहै।" इन परस्पर विरुद्ध दोनों श्रुतियोंका विरोध भी दूर होगया। क्योंकि मनोवृत्तिद्वारा ब्रह्म विषयक अज्ञानका नाश होताहै किन्तु अन्तःकरणवृत्तिमें प्रतिबिम्बित चैतन्य परब्रह्मका प्रकाश नहीं करसक्ता। इस विषयमें प्रमाण भी है शास्त्रकारोंने अन्तःकरणप्रतिबिम्बित चैतन्यके द्वारा परब्रह्म चैतन्यके प्रकाशके निषेध पूर्वक अन्तःकरणवृत्तिके द्वारा तद्विषयक अज्ञानका नाश होना स्वीकार कियाहै क्योंकि परम ब्रह्म स्वप्रकाश स्वरूप है। इसी कारण उसका प्रकाश दूसरेका कराहुआ नहीं होसक्ता है ॥ ८७ ॥

जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति। तथाहि अयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञातनिरसनपुरःसरं स्वगतचिदाभासेन जलमपि घटं भासयति। त-

दुक्तम्—"बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं॥तत्राज्ञानं धिया नश्येदाभासेन घटं स्फुरेत्" इति । यथा प्रदीपप्रभा मण्डलमन्धकारगतं घटादिकं विषयीकृत्य तद्गतान्धकारनिरसनपुरःसरं स्वप्रभया तदवभासयतीति ॥ ८८ ॥

(सं०टी०) इदानीं जडपदार्थविषयकचित्तवृत्तेर्ब्रह्माकारवृत्त्यपेक्षया वैलक्षण्यं दर्शयितुमाह । जडपदार्थेति । अहं ब्रह्मास्मीत्यज्ञानावच्छिन्नब्रह्माकारा चित्तवृत्तिस्तदावरकमज्ञानमात्रं निवर्तयति। ब्रह्म तु स्वप्रकाशात्मत्वात्स्वयमेव प्रकाशते न तु वृत्तिप्रतिबिंबितचिदाभासेन चैतन्यं प्रकाश्यते तत्र तस्यासामर्थ्यात् । अयं घट इति घटाकाराकारितचित्त वृत्तिस्तु घटावच्छिन्नचैतन्यावरकमज्ञानं निवर्त्य निवर्तमाना स्वप्रतिबिंबितचिदाभासेन जडं घटमपि प्रकाशयति।अतः ततो विशेषोस्तीत्यर्थः । एतदेव प्रपंचयितुं प्रतिजानीते । तथाहीति । जडपदार्थविषयिणीं चित्तवृत्तिमभिनीय दर्शयति । अयमिति । वृत्तिसंबंधात्प्राग्घटस्याज्ञातत्वात् अज्ञातं घटं विषयीकृत्य प्रवृत्ताचित्तवृत्तिर्घटगताज्ञानं दूरीकुर्वाणा घटमपि भासयतीत्यर्थः । अस्मिन्नर्थे वृद्धसंमतिमाह । तदुक्तमिति । बुद्धिश्च तत्र बुद्धौ प्रतिबिंबितचिदाभासश्च बुद्धितत्स्थचिदाभासौ द्वावेतौ बुद्धिचिदाभासौ घटं व्याप्नुतः । तत्र तयोर्मध्ये धिया वृत्त्या घटाज्ञानं नश्येच्चिदाभासेन तु घटः स्फुरेदित्यर्थः । अत्रानुरूपं दृष्टांतमाह। यथेति। यथांधकारावस्थितघटादिकं

विषयीकृत्य प्रवर्तमानं दीपप्रभामंडलं घटपटावरकांधकारनि-रसनपुरःसरं स्वप्रभया तदपि भासयति तद्वदित्यर्थः ॥ ८८ ॥

(भा०टी०) अखण्डाकार अन्तःकरणकी वृत्ति सेघ-टादि जड पदार्थाकार अन्तःकरण की वृत्तिका कुछ विशेष है । घटका प्रत्यक्ष होनेके समय घटाकार चित्तवृत्ति अज्ञात घटको विषय करके उसकी अज्ञानका नाश करती हुई अन्तः करण वृत्तिके प्रतिबिम्बद्वारा अर्थात् स्वगत चिदाभासके द्वारा घटका प्रकाश करतीहै । इस विषयमें प्रमाण भी है-"अन्तः-करणवृत्ति और तद्गत् प्रतिबिम्बित चैतन्य यह दोनोंही घ-टको प्राप्त होतेहैं परन्तु अन्तःकरणकी वृत्तिद्वारा घटके अज्ञानका विनाश होताहै और प्रतिबिम्बित चैतन्यद्वारा घट प्रकाशित होताहै। जैसे दीपककी प्रभा अन्धकारमें रक्खे हुए घटपटादिको प्राप्त होकर घटपटादिगत अन्धकारका विनाश करके उनका प्रकाश करतीहै । तिसी प्रकार अन्तःकरणकी वृत्तिद्वारा घटादिका अज्ञान नष्ट होताहै और अन्तःकरण प्रतिबिम्बित चैतन्यके द्वारा घटादिका प्रकाश होता है ८८ ॥

एवंभूतस्वस्वरूपचैतन्यसाक्षात्कारपर्य्यन्तं श्रवण मनननिदिध्यासनसमाध्यनुष्ठानस्याप्यपेक्षितत्वा-त्तेऽपि प्रदर्श्यन्ते । श्रवणं नाम षड्विधलिङ्गैरशेषवेदा न्तानामद्वितीयवस्तुनि तात्पर्य्यावधारणम्। लिङ्गा नि तु उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादो पपत्त्याख्यानि। तदुक्तम्-"उपक्रमोपसंहारावभ्या

सोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्प र्य्यनिर्णये" ॥ ८९ ॥

(सं०टी०) इयता ग्रंथजालेन प्रतिपादितस्य प्रत्यगभि-न्नपरमानंदाखंडचैतन्यस्य साक्षात्कारलक्षणमखंडाकारांतःक-रणवृत्तिं प्रतिपिपादयिषुः तत्साधनभूतश्रवणादेरवश्यानुष्ठेयत्वं तेषां लक्षणानि च क्रमेण दर्शयति। एवंभूतेत्यादिना अद्वैतं वस्तु भासत इत्यंतेन ग्रंथेन । एवंभूतेति । एवंभूतस्योक्तश्रुतियु-क्त्यनुभवैर्निरस्तसमस्तोपाधिप्रत्यगभिन्नपरमानंदचिद्रूपस्य सा-क्षात्कारपर्यंतं श्रवादीन्यनुष्ठेयानीति प्रतिजानीते । तेपीति । श्रवणादयोपीत्यर्थः । तत्र श्रवणस्य लक्षणमाह । षड्विधेति । लीनमर्थं गमयतीति लिङ्गशब्दस्य व्युत्पत्तेः ब्रह्मात्मैकत्वनि-श्चायकैरुपक्रमोपसंहारादिषड्विधलिङ्गैः सर्वेषां वेदांतवाक्याना-मद्वितीये ब्रह्मणि तात्पर्यनिश्चयश्रवणमित्यर्थः । तानि च लिं-गानि क्रमेणोपदिशति । उपक्रमेति। तथा चोक्तम् "उपक्रमोप-संहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिंगं ता-त्पर्यनिर्णये " इति ॥ ८९ ॥

(भा०टी०) इस प्रकार परमात्मा चैतन्यके साक्षात्कार होनेतक श्रवण, मनन, निदिध्यासन, समाधि, और अनुष्ठान यह आवश्यक होते हैं इस कारण अब श्रवणादिके लक्षण दिखलाते हैं। छः प्रकारके लिङ्गोंके द्वारा अद्वितीय ब्रह्ममें सम्पूर्ण वेदान्तके तात्पर्य्यका अवधारण करना श्रवण कहाता है। छः प्रकारके लिङ्ग ये हैं—उपक्रमोपसंहार, अभ्यास, अ-

पूर्वता, फल, अर्थवाद, और उपपत्ति। ग्रन्थान्तरमें भी लिखा-
है—"पूर्वोक्त छः प्रकारके लिङ्ग तात्पर्य्यार्थके निश्चायक
होते हैं" ॥ ८९ ॥

तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यंतयोरुपा-
दानं उपक्रमोपसंहारौ। यथा छान्दोग्ये षष्ठे प्रपा
ठके प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः "एकमे-
वाद्वितीयम्" इत्यादौ "ऐतदात्म्यमिदं सर्वम्" इत्य
न्तेचप्रतिपादनम्। प्रकरणप्रतिपाद्यस्य वस्तुनः
तन्मध्ये पौनः पुन्येन प्रतिपादनमभ्यासः। यथा त-
त्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः
प्रतिपादनम्। प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमा-
णान्तरेणाविषयीकरणमपूर्वत्वम्। यथा तत्रैवाद्वि
तीयवस्तुनो मानान्तराविषयीकरणम्। फलं तु
प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा
तत्र तत्र श्रूयमाणं प्रयोजनम्। यथा तत्रैव "आचा-
र्य्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन्न वि-
मोक्षे, अथ सम्पत्स्ये" इत्यद्वितीयवस्तुज्ञानस्य
तत्प्राप्तिप्रयोजनं श्रूयते। प्रकरणप्रतिपाद्यस्य तत्र
तत्र प्रशंसनमर्थवादः। यथा तत्रैव उत तमादेश-
मप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं
विज्ञातमित्यद्वितीयवस्तुप्रशंसनम्। प्रकरणप्रति-
पाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः।

यथा तत्रैव "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यम्" इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते ॥ ९० ॥

(सं०टी०) उपक्रमोपसंहारौ तावद्दर्शयति । तत्रप्रकरणप्रतिपाद्यस्येति । तदुदाहृत्य दर्शयति । तथेति । एकमेवाद्वितीयमित्युपक्रम्य ऐतदात्म्यमिदं सर्वमिति प्रतिपादनमुपक्रमोपसंहारावित्यर्थः । अभ्यासस्य लक्षणमाह । पौनःपुन्येनेति । अत्रापि श्रुतिमुदाहरति । यथेति अपूर्वत्वस्य लक्षणमाह । प्रमाणांतरेति। "तं त्वौपनिषदं पृच्छामि" इत्यादिश्रुतिभिरुपनिषन्मात्रवेद्यत्वप्रतिपादनाद्ब्रह्मणोऽपूर्वत्वमित्यर्थःअथवा स्वप्रकाशत्वेन स्वव्यवहारे स्वातिरिक्तप्रमाणानपेक्षत्वात् ब्रह्मणोपूर्वत्वमित्यर्थः । क्रमप्राप्तस्य फलस्य लक्षणमाह फलं त्विति । अत्रानुरूपमुदाहरणमाह । आचार्यवानित्यादिश्रवणादिसाधनानांब्रह्मात्मैकत्वविज्ञानं प्रयोजनं ब्रह्मज्ञानस्य तु तत्प्राप्तिः फलम् "ब्रह्मविद् ब्रह्मैव भवति।तरति शोकमात्मवित्" इत्यादिश्रुतेरित्यर्थः । पंचमलिंगस्याप्यर्थवादस्य लक्षणमाह । प्रशंसनमिति । प्रकरणप्रतिपाद्याद्वितीयब्रह्मस्वरूपस्तावद्वाक्यमर्थवाद इत्यर्थः । अत्रापि श्रुतिमाह । उततमादेशमप्राक्ष्यइत्यादि "येनाश्रुतं श्रुतं भवति" येन सकलप्रपंचाधिष्ठानब्रह्मस्वरूपश्रवणेनाश्रुतं प्रपंचजातमपि श्रुतं भवति येन ब्रह्मज्ञाने-

नाज्ञातं सर्वं जगत् ज्ञातं भवति येन ब्रह्मसाक्षात्कारेणासाक्षात्कृतं साक्षात्कृतं भवति ब्रह्मणः सर्वतः संप्लुतोदकस्थानीयत्वादित्यर्थः। अवशिष्टाया उपपत्तेर्लक्षणमाह । प्रकरणेति। तामुदाहरति । यथेति । मृद्विकारेषु घटादिषु विकारनामधेययोर्वाचारंभणमात्रत्वेन तथामृन्मयत्वमेवावशिष्यते नान्यत्तथा चिद्विवर्तस्य प्रपञ्चस्य गिरिनदीसमुद्रात्मकविकारनामधेययोर्वाचारंभणमात्रत्वाच्चिन्मात्रमेवावशिष्यते रज्जुविवर्तस्य सर्पस्य रज्जुमात्रावशेषवदित्यर्थः ॥ ९० ॥

(भा०टी०) जिस प्रकरणमें जो वस्तु प्रतिपादन करनेके योग्य हो उस प्रकरणमें आदिसे लेकर अन्त पर्य्यन्त उसी वस्तुका प्रतिपादन करना उपक्रमोपसंहार कहाताहै। जैसाकि छान्दोग्य के षष्ठ अध्याय की आदिमें (एकमेवाद्वितीयं ब्रह्म) "अद्वितीय ब्रह्मही एकहै"और अन्तमें भी "यह आत्माही जगन्मय है"इस प्रकार प्रकरणका प्रतिपाद्य वस्तु अद्वितीय ब्रह्मका ही प्रतिपादन कियाहै। इसी प्रकार जिस प्रकरणमें जो वस्तु प्रतिपादन करनेके योग्यहै उसी वस्तुका वारम्वार प्रतिपादन करना अभ्यास कहाता है। छान्दोग्यके षष्ठाध्यायमें ही जिस प्रकार "तत्त्वमसि" इस वाक्यद्वारा अद्वितीय ब्रह्मका नौ ९ वार प्रतिपादन कियाहै । जिस प्रकरणमें जो वस्तु प्रतिपादन करने योग्य हो उस वस्तुके प्रमाणसे अतिरिक्त प्रमाणके विषयको छोडकर उसी वस्तुके प्रतिपादन करनेको अपूर्वता कहते हैं। उसी षष्ठाध्यायमें ही केवल उपनिषदोंके प्र-

माणसे ही जिसप्रकार अद्वितीय ब्रह्मका प्रतिपादन कियाहै उसविषयमें अन्य प्रमाण का नामभी नहीं लियाहै। जिस प्र-करणमें जो वस्तु प्रतिपादन करने योग्य हो उस प्रकरणमें उसी वस्तुका अथवा उस वस्तुके अनुष्ठानका श्रवण करना फल कहाता है जैसा कि उसी षष्ठाध्यायमें लिखाहै "आ-चार्य्यवान् पुरुष ब्रह्मके जाननेमें समर्थ होताहै वही ज्ञानी पुरुष विमुक्त पर्यन्त प्रतीक्षा करताहै और विमुक्ति होनेपर परब्रह्ममें लीन होजाताहै" इस प्रकार अद्वितीय ब्रह्म-ज्ञानका ब्रह्मप्राप्ति होनेमें प्रयोजन है। ऐसा श्रुतिमें कहाहै। जिस प्रकरणमें जो वस्तु प्रतिपादक करने योग्य हो उस वस्तु-की प्रशंसाका नाम अर्थवाद है। जैसा कि उसी षष्ठ अध्याय में कहाहै। गुरु शिष्यको कहते हैं हे शिष्य! तूने हमसे जिसका प्रश्न कियाहै उसको सुन। नहीं सुने हुये पदार्थका श्रवण क-रना, भूले हुये पदार्थका स्मरण करना; नहीं जाने हुये पदार्थका जानना। इस प्रकार उस अद्वितीय ब्रह्म वस्तुकी प्रशंसा कही-है। जिस प्रकरणमें जो वस्तु प्रतिपादन करने योग्य हो उस प्रकरण उसी वस्तुके प्रतिपादन की युक्तिका नाम उपपत्ति है। जैसा कि उसी षष्ठाध्यायमें कहाहै कि "हे सौम्य! जिस प्रकार एक मृत्तिकाके पिण्डका ज्ञान होनेपर संपूर्ण मृत्तिकाके पात्रा-दिकोंका ज्ञान हो जाताहै मृत्तिकाकी कम्बुग्रीवादि विकृति और नाम कहना मात्र है यथार्थ मृत्तिकाही है। इसी प्र-

कार अद्वितीय वस्तु ब्रह्मके प्रतिपादन करनेमें विकारकी कथनमात्र युक्ति देखनेमें आतीहै वास्तविक नहीं ॥ ९० ॥

मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभिरनवरतमनुचिन्तनम् । विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहः निदिध्यासनम्। समाधिश्च द्विविधः। सविकल्पको निर्विकल्पकश्चेति तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षया द्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम् । तदा मृन्मयगजादिभानेऽपि मृद्भानवत् द्वैतभानेऽप्यद्वैतं वस्तु भासते । तदुक्तमभियुक्तैः-"दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमव्ययम् । तदेव चाहं सततं विमुक्तम्। दृशिस्तु शुद्धोऽहमविक्रियात्मको न मेऽसिबद्धो न च मे विमोक्षः" इत्यादि ॥ ९१ ॥

(सं०टी०) श्रवणनिरूपणानंतरं तदुत्तरांगस्य मननस्य लक्षणमाह। मननं त्विति। षड्विधलिंगतात्पर्यपूर्वकं श्रुतस्याद्वितीयब्रह्मणो वेदांताऽविरोधिनीभिर्युक्तिभिर्नैरंतर्येणानुचिंतनं मननमित्यर्थः। निदिध्यासनस्य लक्षणमाह। विजातीयेति । विजातीयदेहादिबुद्ध्यन्तजडपदार्थविषयकप्रत्ययनिराकरणेन सजातीयाद्वितीयवस्तुविषयकप्रत्ययप्रवाहीकरणं निदिध्यासनमित्यर्थः । व्युत्थाननिरोधसंस्कारयोरभिभवप्रा-

दुर्भावे सति चित्तस्यैकाग्रतापरिणामः समाधिः । स च द्विवि
ध इत्याह । सविकल्पको निर्विकल्पकश्चेति । तस्य लक्षणमाह ।
तत्रेति। तत्र तयोः सविकल्पनिर्विकल्पकयोर्मध्ये, सविकल्पको
पि द्विविधः। अहं ब्रह्मास्मीति शब्दानुविद्धतयाऽद्वितीये वस्तु-
नि चित्तवृत्तेरवस्थानमित्येकः। द्वितीयस्तु ज्ञातृज्ञानज्ञेयत्रिपु-
टीविलयानपेक्षयाहंब्रह्मास्मीति दृश्यानुविद्धतयाऽद्विती-
यवस्तुन्यविच्छेदेन चित्तवृत्तेरवस्थानमित्यर्थः। ननु "भक्षितेपि
लशुने न शांतो व्याधिः" इति न्यायेनोक्तसविकल्पक-
समाध्योः सकलभेदनिराकरणाय प्रवर्तमानयोरपि ज्ञात्रादिभे-
दविषयत्वेन नाद्वैतवस्तुमात्रभानं तत्रेत्याशंक्येतरमाह । त-
देति । तदा सविकल्पकसमाध्यनुभवकाले ज्ञात्रादिभेदप्र-
तीतावप्यद्वैतं वस्तु भासत एव सुवर्णमयकुंडलादिभाने सुवर्ण-
भानवन्मृन्मयघटादिभाने मृद्भानवच्च घटादिभानस्य वाचारं-
भणमात्रत्वात् ज्ञात्रादिभानस्यापि वाचारंभणमात्रत्वादद्वैतमे-
व वस्तु भासत इत्यर्थः।यद्वा"सर्वं खल्विदं ब्रह्म ऐतदात्म्यमिदं स
र्वम्" इत्यादिश्रुतिबलात्सर्वमहमिति गिरिनदीसमुद्रात्मकं सर्वं
जगत्स्वाभिन्नसच्चिदानंदब्रह्मत्वेनानुभूय तस्य दग्धपटन्यायेन प्र-
पंचभानेप्यद्वैतं सच्चिदानंदलक्षणं वस्तु भासत एव इत्यर्थः । त
दुक्तं भगवता "वासुदेवः सर्वमिति स महात्मा सुदुर्लभः" इति
मूलकारोप्यस्मिन्नर्थे ग्रंथांतरसंमतिं दर्शयति।तदुक्तमिति। ॐ-
मिति यत्परं ब्रह्म तदेवाहमित्यन्वयः। किं तदित्याह।दृशिस्वरू-
पमिति । दृशिः दृष्टिः तस्याः रूपं द्रष्टृत्वं तद्यस्य परमात्म-

स्वरूपस्य तद्दृशिस्वरूपं साक्षिस्वरूपमित्यर्थः। तदुक्तं भगवता 'उपद्रष्टानुमंता च भर्ता भोक्ता महेश्वरः॥ परमात्मेति चाप्युक्तो देहेस्मिन्पुरुषः परः" इति।पुनः किंरूपं तत् गगनोपमं गगनं उपमा दृष्टांतो यस्य तद्गगनोपमं गगनवन्निर्लेपस्वरूपमित्यर्थः तथा च भगवद्वचनं "तथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते" इति। यद्वा गगनोपमं गगनवदमूर्तस्वरूपमित्यर्थः"आकाशशरीरं ब्रह्म"इतिश्रुतेः।पुनः किंभूतं सकृदेकदैव विभातं सर्वदैकस्वरूपेण भासमानं चंद्रादिप्रकाशवन्नवृद्धिक्षयशीलमित्यर्थः।पुनःकिंरूपं अजं जन्मराहितं,एकं निरस्तसर्वोपाधिभेदं,अक्षरं विनाशधर्मराहित्येन कूटस्थस्वरूपमित्यर्थः।तथा च भगवानाह। "क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते"इति। अलेपकं असंगत्वादविद्यादिदोषरहितमित्यर्थः "असंगो ह्ययं पुरुषः"इतिश्रुतेः॥ सर्वगतं सर्वत्र ब्रह्मादिस्थावरांतेषु गतं व्याप्तं अद्वयं सजातीयविजातीयस्वगतभेदराहित्येन द्वितीयरहितं सततं विमुक्तमिति सर्वदाकार्यकारणात्मकसर्वोपाधिविनिर्मुक्तत्वेन सततमेकरूपमित्यर्थः।तथाच भागवते "बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः" इति। तथा च एतादृशं निरतिशयानंदं यत्परं ब्रह्म तदेवाहमिति। भावयतो निषेधप्रतियोगित्वेन तत्तदुपाधिभानात्तत्तत्प्रयुक्तभेदभानेप्यद्वैतं भासत एवेत्यर्थः ॥ ९१ ॥

(भा०टी०) अब मननका लक्षण कहतेहैं।वेदान्तके अनुकूल युक्तिद्वारा चिरकालसे श्रवण किये हुए अद्वितीय ब्रह्म

वस्तुकी चिन्तना का नाम मननहै । तत्त्वज्ञानके विरोधी देहादि जड पदार्थ ज्ञानको त्याग कर अद्वितीय ब्रह्म वस्तुके अनुकूल ज्ञानके प्रवाह (आधिक्य) को निदिध्यासन कहतेहैं । समाधि दो प्रकार का है । एक सविकल्पक, दूसरा निर्विकल्पक । ज्ञाता ज्ञान और जानने योग्य वस्तु इन तीन पदार्थोंको पृथक् पृथक् ज्ञान होनेपरभी अद्वितीय ब्रह्म वस्तुमें अखंडाकार चित्तकी वृत्ति होना सविकल्पक समाधि कहाताहै । जैसे मृत्तिकाके हस्तीसे हस्तीका ज्ञान होनेपर भी मृत्तिकाही है ऐसा ज्ञान होताहै तिस प्रकार द्वैतज्ञान होने परभी अद्वैत ज्ञान होताहै । इस विषयमें प्रमाण भी कहाहै—" सर्वसाक्षी, सर्वव्यापी, सर्वोत्कृष्ट, स्वप्रकाशस्वरूप, जन्ममृत्युरहित, निर्लिप्त, और सर्वदा मुक्तस्वभाव जो अद्वितीय ब्रह्म है सो मैं हूं " ॥ ९१ ॥

निर्विकल्पकस्तु ज्ञातृज्ञानादिभेदलयापेक्षया द्वितीयवस्तुनि तदाकाराकारिताया बुद्धिवृत्तेरतितरामेकीभावेनावस्थानम् । तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवत् द्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवावभासते । ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति । उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः ॥ ९२ ॥

(सं० टी०) समाधिस्वरूपमाह । निर्विकल्पकास्त्व-

ति। अयं च द्विविधः चिरकालाभ्यस्तपटुतरसविकल्पकसमाध्यनुभवजनितसंस्कारसहकृतायाः चित्तवृत्तेर्ज्ञात्रादित्रिपुटीलयपूर्वकमद्वैतवस्तुन्येकभावनात्मकः। प्रथमः एतन्निर्विकल्पकसमाध्यभ्यासपाटवेन लुप्तसंस्कारतया ज्ञात्रादित्रिपुटीलयपूर्वकमखंडाकारितायाःचित्तवृत्तेर्विनापिस्वस्फूर्तिकेवलचिदात्मना च स्थानात्मको द्वितीयः।तत्र द्वितीयपक्षमभिप्रेत्याह। ज्ञातृज्ञानादीति। नन्वेवं समाधिसुषुप्त्योर्विक्षेपाभावेन वृत्त्यभानादभेदमाशंक्य परिहरति। तत्र युक्तिमाह। उभयत्रेति। समाधिसुषुप्त्योरित्यर्थः। तत्सद्भावेति समाधावज्ञायमानवृत्तिसद्भावात् सुषुप्तौ वृत्त्यभावाच्च तयोर्भेदोपपत्तेरित्यर्थः॥ ९२॥

(भा०टी०) ज्ञाता ज्ञान और जानने योग्य वस्तु तीन पदार्थोंका भेद ज्ञानका अभाव होनेपर अद्वितीय ब्रह्मवस्तुमें अखण्डाकार चित्तकी वृत्ति होना निर्विकल्पक समाधि कहाताहै। इस समाधिके समय जिस प्रकार जलमें मिले हुए लवणके लवणत्व ज्ञानका अभाव होनेपर केवल जलका ज्ञान होताहै तिसी प्रकार अद्वितीय ब्रह्माकार चित्तवृत्तिके ज्ञानकी सत्ताका अभाव होनेपर भी ब्रह्म वस्तुमात्र ज्ञान रहताहै अर्थात् अखण्ड ब्रह्ममें चित्तवृत्तिके लीन होनेपर और भिन्नरूप कुछ ज्ञान नहीं होताहै अखण्ड ब्रह्ममय ज्ञानही होताहै इसी कारण सुषुप्ति अवस्थासे निर्विकल्पक समाधिका भेद कोई भेद नहीं है इस प्रकार आशंकाभी नहीं होतीहै क्योंकि सुषुप्ति

अवस्थासे और निर्विकल्पक समाधि अवस्थामें वृत्तिज्ञान की अभाव अंशमें समानता होनेपर भी वृत्तिकी सत्ता और सत्ताद्वारा समाधि और सुषुप्तिका भेद है ॥ ९२ ॥

अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः । तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः । करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीनि आसनानि । रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाःप्राणायामाः । इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः । अद्वितीयवस्तुन्यन्तारिन्द्रिधारणं धाराणा । तत्र द्वितीयवस्तुनि विच्छिद्यविच्छिद्य अन्तारिन्द्रियवृत्तिप्रवाहः ध्यानम् । समाधिस्तु उक्तः सविकल्पक एव ॥ ९३ ॥

(सं०टी०) उक्तसमाधेः साधनापेक्षायामाह । अस्येति । तानि च साधनानि क्रमेणोद्दिशति । यमेति । यमाद्यष्टांगानि समाधेरंतरंगसाधनानीत्यर्थः।प्रथमं यमस्य लक्षणमाह । तत्रेति तेषु यमाद्यष्टांगेषु मध्ये अहिंसादयः पंच यमा अवश्याः अनुष्ठेया इत्यर्थः । तदनंतरं नियमानाह। शौचेति शौचादयः पंच नियमा इत्यर्थः । आसनं लक्षयति । आसनानीति। करचरणादिसंस्थानविशेषलक्षणानि पद्मकस्वस्तिकादीनि आसनानि । प्राणायामलक्षणमाह । रेचकेति । " इडया पूरयेद्वायुं मुंचेद्दक्षि-

णयानिलम् । यावच्छ्वासं समासीनः कुंभयेत्तं सुषुम्नया " यदा योगी पद्मासने उपविश्य योगमभ्यस्यति तदा गुल्फाभ्यां गुदमूलं निष्पीड्य खेचरीमुद्रासहायेन प्राणधारणया सुषुम्नामार्गेण मूलाधारात्कुंडलिनीमुत्थाप्य स्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञानिर्वाणाख्यषट्चक्रभेदक्रमेण सहस्रदलकमलकर्णिकायां विद्यमानपरमात्मना सह प्राणं संयोज्य तत्रैव चित्तं निर्वातदीपवन्निश्चलं कृत्वा स्वात्मानंदरसं पिबतीत्येतत्प्राणायामफलम्। स च द्विविधः अगर्भः सगर्भश्चेति "मुंचेद्दक्षिणया वायुं मात्राहीनमनन्यधीः।पूरयेद्वामया तद्वत्कुंभयेच्च सुषुम्नया॥यावच्छ्वासं जितश्वासो भवेन्मासाज्जितेन्द्रियः" इति वचनात् प्रणवोच्चारणराहित्येनोक्तरेचकपूरककुंभकक्रमेण प्राणनिरोधोऽगर्भप्राणायामः "रेचयेत् षोडशेनैव तद्द्वैगुण्येन पूरयेत् । कुंभयेच्च चतुःषष्ट्या प्रणवार्थमनुस्मरन्" इतिवचनात् षोडशप्रणवं मनसा जपन्दक्षिणया वायुं विरेच्य द्वात्रिंशत्संख्याकप्रणवं मनसा समुच्चरन् वामया वायुमापूर्य चतुःषष्टिसंख्याकं प्रणवं मनसा जपंस्तदर्थंचअकारोकारमकारार्द्धमात्रात्मकसार्धत्रिमात्रात्मक सार्धत्रिवलयाकारकुंडलिनीरूपं चिदानंदकंदं च मूलाधारादिब्रह्मरंध्रांतमनुसंदधत्सुषुम्नया चित्तमपि तदेकप्रवणं कुर्वन् यावच्छ्वासं कुंभयेत् । तदुक्तमाचार्यैः "षोडशतद्द्विगुणचतुष्षष्टिमात्राणि च क्रमशः ॥ रेचकपूरककुंभकभेदैः त्रिविधः प्रभंजनायामः" इति प्राणायामप्रकारः ॥ क्रमप्राप्तं प्रत्याहारं निरूपयति। इंद्रियाणामिति । श्रोत्रादीनामिंद्रियाणां स्वस्वविषयेभ्यः श-

ब्दादिभ्यः सकाशात्पाषाणोपरि प्रयुक्तः शरसंघातः तद्वत्प्र-
त्यावर्तनं प्रत्याहारः । नन्विंद्रियाणां स्वस्वविषयेभ्यो निवर्तनं
प्रत्याहार इत्युक्तं तन्न संभवति शब्दादिविषयाणां सुखसाध-
नत्वेन वैषयिकसुखव्यतिरिक्तनिरतिशयानंदसद्भावे प्रमाणा-
भावाद्धैरण्यगर्भाद्यमृतभोगस्यैश्वरेणापि त्यक्तुमशक्यत्वादिति
चेत् । न । मूढैः कर्मजडैर्विषयलंपटैः त्यक्तुमशक्यत्वेपि शुद्धां-
तःकरणेन संसारावियकत्वदर्शिना विषयदोषदर्शनेन तुच्छी-
कृतशब्दादिविषयप्रपंचेन पुरुषोत्तमेनं पुरीषवत् त्यक्तुं-
शक्यत्वात् । अन्यथा संन्यास एव लुप्येत "तस्मात्
न्यासमेषां तपसामतिरिक्तमाहुः । एतमेव लोकमभी-
प्संतः प्रव्राजिनः प्रव्रजंति । एतत्सर्वं भूः स्वाहेत्यप्सु परि-
त्यज्यात्मानमनिच्छेत्"। "न कर्मणा न प्रजया धनेन त्यागेनै-
केनामृतत्वमानशुः" ।ब्रह्मचर्यादेव प्रव्रजेत यदहरेव विरजेत्तद-
हरेव प्रव्रजेत् वनाद्गृहाद्वा । सर्वधर्मान्परित्यज्य मामेकं श-
रणं व्रज "इति।संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया" प्रव्रजंत्य-
कृतोद्वाहाः परवैराग्यमाश्रिताः प्रत्यग्विविदिषासिद्ध्यै वेदानुव-
चनादयः।ब्रह्मावाप्त्यैवतत्त्यागमभीप्संतीतिश्रुतेर्बलात्"इत्यादि
श्रुतिस्मृतिभिः तथा "आनंदो ब्रह्मेति व्यजानात् एतस्यैवानंद-
स्यान्यानि भूतानि मात्रामुपजीवंतीति एषोस्य परमानंदःआत्मै
वानंद यदेष आकाश आनंदो न स्यात् आनंदाद्ध्येवखलु"
इत्यादिश्रुतिभिश्च नित्यात्मसुखस्य प्रतिपादितत्वाच्छब्दा-
दिवैषयिकसुखव्यतिरिक्तनित्यनिरतिशयानंदसद्भावे प्रमाणा-

भावादित्येतदपि निरस्तं बोद्धव्यम् ॥ संप्रति धारणां लक्षयति । अद्वितीयवस्तुनीति । सर्वेषां बुद्धिसाक्षितया विद्यमाने वस्तुनि चित्तनिक्षेपणं धारणा इत्यर्थः । धारणपाटवाभावेन चित्तस्थैर्याभावादद्वितीयवस्तुनि विच्छिद्यविच्छिद्यचित्तवृत्तिप्रवाहकरणं ध्यानमित्याह। तत्रेति । समाधिरुक्त एव सविकल्पकः स्मर्तव्य इत्याह । समाधिरिति ॥ ९३ ॥

(भा० टी०) यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि ये सम्पूर्ण निर्विकल्पक समाधिके अङ्ग हैं । अहिंसा, सत्य, चोरीका त्याग, ब्रह्मचर्य्य और अपरिग्रह इन सबके धारणका नाम यम है । पवित्रता, सन्तोष, तपस्या, अध्ययन और ईश्वरप्रणिधान इनको नियम कहतेहैं । हस्तपादादिके संस्थान विशेष जो स्वस्तिक पत्र इत्यादि हैं सो आसन कहातेहैं । रेचक, पूरक, कुम्भकरूप प्राण वायुके निग्रह करनेके उपायका नाम प्राणायामहै । शब्दादि विषयोंसे श्रवणादि इन्द्रियोंका हटाना प्रत्याहार कहाताहै । अद्वितीय ब्रह्म वस्तुमें अन्तःकरणके अभिनिवेशका नाम धारणा है । अद्वितीय ब्रह्मवस्तुमें चित्तवृत्तिके प्रवाहका नाम ध्यान है । पूर्वोक्त सविकल्पक समाधिका नाम समाधि है ॥ ९३ ॥

एवमस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति । लयस्तावत् अखण्डवस्त्वनवलम्बनेन चित्तवृत्ति-

निंद्रा । अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर-
न्यवलम्बनं विक्षेपः । लयविक्षेपाभावेऽपि चि-
त्तवृत्तेरागादि वासनया स्तब्धीभावात् अखण्डव
स्त्वनवलम्बनं कषायः । अखण्डवस्त्वनवलम्बने-
नापि चित्तवृत्तेः सविकल्पानन्दास्वादनं रसास्वा-
दः । समाध्यारम्भसमये सविकल्पानन्दास्वाद-
नं वा ॥ ९४ ॥

(सं०टी०) उक्तयमाद्यष्टांगसहितनिर्विकल्पकसमाधेर्नि-
र्विघ्नानुष्ठानसिद्ध्यर्थं विघ्नज्ञानव्यतिरेकेण तन्निवारणस्य कर्तु-
मशक्यत्वादस्य चतुरो विघ्नान् दर्शयति ।एवमस्येति ।तत्राद्यं
विघ्नं लक्षयति । लयस्तावदिति । लयो द्विविधः चिरकालप्रयु-
क्ताष्टांगसहितनिर्विकल्पकसमाध्यभ्यासपाटवेनातितप्तलोहतल
क्षिप्तजलबिंदुवत्तैलरहितदीपकलिकावच्च प्रत्यगभिन्नेपरमानंद
चित्तवृत्तेर्लयः प्रथमः । द्वितीयस्तु मूर्छावस्थावत् आलस्येन
चित्तवृत्तेर्बाह्यशब्दादिविषयग्रहाणानादरे सति प्रत्यगात्मस्वरू-
पानवभासनाद्वृत्तेःस्तब्धीभावलक्षणनिद्रारूपः ।तत्राद्यमंगीकृत्य
द्वितीयस्य विघ्नत्वेन तत्त्यागाय तत्स्वरूपमाह । लयस्ताव-
दिति । द्वितीयं विघ्नमाह । अखंडेति । अखंडवस्तुग्रहणायां-
तर्मुखतया प्रवृत्तायाः चित्तवृत्तेः चिदनवलंबनेन त्रस्तपक्षिवत्पु-
नर्बाह्यविषयग्रहणाय प्रवृत्तिर्विक्षेप इत्यर्थः । तृतीयं विघ्नमाह ।
लयेति । रागादयः त्रिविधाः । बाह्या आभ्यंतरा वासनामा-
त्ररूपाश्चेति । बाह्याः पुत्रादिविषयाः । आभ्यंतरा मनोराज्या-

दयः। संस्काररूपा वासनामयाः। तत्रानेकजन्माभ्यस्तबाह्या-भ्यंतररागाद्यनुभवजनितसंस्कारैःकलुषीकृतं चित्तं कथंचिच्छ्र-वणादिसाधनेनांतर्मुखमपि चैतन्यग्रहणसामर्थ्याभावान्मध्येएव स्तब्धीभवति यथा राजदर्शनाय स्वगृहान्निर्गत्य राजमन्दिर-प्रविष्टस्य कस्यचित्पुरुषस्य द्वारपालनिरोधेन स्तब्धीभावः तथा परित्यक्तबाह्यविषयस्याखंडवस्तुग्रहणाय प्रवृत्तस्य चित्तस्यो-द्बुद्धरागादिसंस्कारैः स्तब्धीभावादखंडवस्त्वग्रहणं कषाय इत्य र्थः।चतुर्थविघ्नमाह।अखंडेति। उक्तसविकल्पकसमाध्योर्मध्ये द्वितीयः शब्दानुविद्धः त्रिपुटीविशिष्टः तस्मिन्नानंदो बाह्यश-ब्दादिविषयप्रपंचभारत्यागप्रयुक्तो न तु चैतन्यप्रयुक्तः यथा निधिग्रहणाय प्रवृत्तस्य निधिपरिपालकभूतप्रेताद्यावृतस्य नि-धिप्राप्त्यभावेपि भूताद्यनिष्टनिवृत्तिमात्रेण कोपि महानानं-दो भवति तथा सविकल्पकसमाधावखंडवस्त्वनवलंबनानि-त्यानंदरसास्वादनाभावेपि अनिष्टबाह्यप्रपंचनिवृत्तिजन्यानंदं सविकल्परूपं ब्रह्मानंदभ्रमेणास्वादयतीति तत् रसास्वादनमि-त्यर्थः। लक्षणांतरमाह। समाधीति। निर्विकल्पकसमाध्यारं-भकालेऽनुभूयमानसविकल्पकानंदत्यागासहिष्णुतया पुनः त-स्यैवास्वादनं रसास्वाद इत्यर्थः॥ ९४॥

(भा०टी०) पूर्वोक्त यमादि अङ्गयुक्तनिर्विकल्पक समा-धिके चार विघ्न होते हैं। जैसे लय, विक्षेप, कषाय, और रसास्वा-दन। अखण्ड ब्रह्मवस्तुके अवलम्बनकरनेमें असमर्थ चित्तवृति-की जो निद्रा है उसका नाम लयहै। अखण्ड ब्रह्मवस्तुके अवल

म्बन करनेमें असमर्थ अन्तःकरणवृत्तिका जो अन्य वस्तुका अवलम्बन है उसको विक्षेप कहते हैं। लय और विक्षेपके न होनेपर रागादि वासनासे अन्तःकरण स्तब्ध होजाताहै तब अखण्ड ब्रह्मवस्तुके अवलम्बनकी असामर्थ्यका नाम कषाय है। निर्विकल्पक अखण्ड ब्रह्मवस्तुके अवलम्बन करनेमें असमर्थ अन्तःकरणकी वृत्तिके सविकल्पक आनन्द आस्वादन का नाम रसास्वादन है अथवा निर्विकल्पक समाधिके आरम्भके समय सविकल्पक रसास्वादनकोभी रसास्वादन कहतेहैं।

अनेन विघ्नचतुष्टयेन रहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रमवशिष्यते यदा तदा निर्विकल्पकः समाधिरित्युच्यते तदुक्तम्—"लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः।सकषायं विजानीयाच्छमप्राप्तं न चालयेत्। नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्"।इत्यादि "यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता" इत्यादि च ॥९८॥

(सं०टी०) प्रोक्तविघ्नचतुष्टयनिवृत्तेः फलमाह।अनेनेति।लयादिविघ्नाभावसहितं चित्तं यदा निर्वातदीपवदचलमखण्डचैतन्यमात्रमवतिष्ठते तदा निर्विकल्पकसमाधिरित्यर्थः।लयादिविघ्नसद्भावे तन्निवृत्तिप्रकारे च वृद्धसंमतिमाह। तदुक्तमिति। पूर्वोक्तनिद्रालक्षणे लये जाते सति तन्निवृत्त्यर्थं चित्तं संबोधयेत् चित्तगतजाड्यादिपरित्यागेन चित्तमुद्बोधयेत् उक्तविक्षेपयुक्तं चित्तं यदा भवति तदा विषयवैराग्यादिना चित्तं शमयेत्

बहिर्मुखतां परित्यज्यांतर्मुखं कुर्यात् उक्तरागादिकषाय सहितं चित्तं यदा भवेत्तदा विजानीयादियं रागादिवासनाबाह्यविषयप्रापिका नत्वखंडवस्तुप्रापिका अतो नेयं समीचीनेति विविच्य प्रत्यक्छ्रवणवासनायाः सकाशादियं निकृष्टाऽतस्त्याज्येयमिति जानीयादित्यर्थः।यद्वा सम्यग्वस्तुन्यप्राप्तं चित्तं यदा भवति तदा तच्चित्तं कषायसहितंजानीयात्तच्चित्तं यावताकालेन रागादिवासनाक्षयसहितं भवति तावत्कालंतच्चित्तंस्वस्थानान्न चालयेद्वासनाक्षयानंतरं चित्तं स्वत एव प्रत्युक्प्रवणं भवतीत्यर्थः।नास्वादयेदिति।पूर्वोक्तसविकल्पकरसं विषयप्रपंचभारत्यागजन्यं नास्वादयेन्नानुभवेत्। तत्र युक्तिमाह। निःसंग इति। यतो निःसंगो वैषयिकसुखदुःखादिसंगरहितः अतः प्रज्ञया युक्तो भवेत् स्थिरप्रज्ञो भवेदित्यर्थः। तदुक्तं भगवता "प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्।आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते"इति। तस्माल्लयादिविघ्नाभावविशिष्टचित्तस्य चिन्मात्रतयावस्थानं निर्विकल्पकसमाधिरित्यर्थः। तत्र भगवानाह। यथेति। अथ निर्विकल्पकसमाधौ स्वगुरूपदिष्टमार्गेण यथामति किंचिद्विचार्यते। पंचभूमिकोपेतस्य चित्तस्य भूमिकात्रयपरित्यागेनावशिष्टं भूमिकाद्वयं समाधिरित्युच्यते।कास्ताः पंचभूमिकाः।क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धं चेति पंच चित्तभूमिकाः। तत्र सुरसंपल्लोकशास्त्रदेहवासनासु वर्त्तमानं क्षिप्तमित्युच्यते,निद्रातंद्रादिग्रस्तं चित्तं मूढमित्युच्यते, कदाचित्कृतध्यानयुक्तमपि बहिर्गमनशीलं उक्तक्षिप्ता-

द्विशिष्टतया विक्षिप्तं चित्तमित्युच्यते, तत्र क्षिप्तमूढयोः समाधित्वशंकैव नास्ति विक्षिप्ते तु चेतसि विक्षेपांतर्गततया दहनांतर्गतबीजवच्चित्तस्य सद्यएव विनाशात्तदापि न समाधिः। एकाग्रतां पतञ्जलिः सूत्रयति "शांतोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता परिणामः" इति। अस्यार्थः। शांतोऽतीतःउदितोवर्तमानः चित्तवृत्तिरतीतवर्त्तमानप्रत्ययौ भवतः। अतीतप्रत्ययो यं पदार्थं गृह्णाति उदितोपि तमेव चेत् गृह्णीयात् तदा तावुभौ तुल्यौ भवतः। तादृशएव चित्तस्य परिणाम एकाग्रतेत्युच्यते, एकाग्रताभिवृद्धिलक्षणं समाधिं सूत्रयति । सर्वार्थैकाग्रतयोः क्षयोदयौ चित्तस्य परिणामः समाधिरिति रजोगुणेन चाल्यमानं चित्तं क्रमेण सर्वानर्थान्पदार्थान्परिगृह्णाति तस्य रजोगुणस्य निरोधाय क्रियमाणेन प्रयत्नविशेषेण दिने दिने योगिनः सर्वार्थता क्षीयते एकाग्रता चोदेति तादृशः चित्तस्य परिणामः समाधिरित्यर्थः। अस्य समाधेरष्टांगेषु यमनियमासनप्राणायामप्रत्याहाराः पंच बहिरंगानि। हिंसादिभ्यो निषिद्धेभ्यो योगिनः कर्म्मभ्यो यमयंति निवर्तयंतीत्यहिंसादयो यमाः। जन्महेतोः काम्यधर्मान्निवर्त्य मोक्षे हेतौ निष्कामधर्मे नियमयंति प्रेरयंतीति शौचादयो नियमाः। यमनियमयोरनुष्ठानवैलक्षण्यं स्मर्यते "यमान्सेवेत सततं न नित्यं नियमान्बुधः। यमान्पतत्यकुर्वाणोनियमान्केवलान् भजन्" इति बुद्धया यमनियमौ समीक्ष्य यमबहुलेषु प्रयत्नेषु बुद्धिमनुसंदधीत । आसनप्राणायामप्रत्याहारा व्याख्याताः ॥ ९५ ॥

(भा०टी०) जिस समय चित्त पूर्वोक्त चार प्रकारके विघ्नोंसे रहित होकर वायुरहित स्थानमें स्थित दीपककी तरह अचलहुआ केवल अखण्ड चैतन्यमात्रकी चिन्तामें तत्पर होता है उस समय चित्तका निर्विकल्पक समाधि कहाता है श्रुतिके प्रमाणसेभी जाना जाता है-"लयरूप विघ्न उपस्थित होनेपर अन्तःकरणमें उद्बोधकको उत्पन्न करै अन्तःकरणके विक्षेपरूप विघ्नके तिरस्कृत होनेपर उसको शान्त करै। कषायरूप विघ्नयुक्त हुए चित्तको जानकर निवृत्त रक्खै। जिस समय अखण्ड ब्रह्म वस्तुमें प्रणिधान होय उससमय अन्तःकरणको चलायमान न करै। उस समय कोई सविकल्पक आनन्द आस्वादन न करै। और प्रज्ञाद्वारा निःसंग होजायहै। इस विषयमें स्मृतिका प्रमाणभी है-"जिसप्रकार दीपक वायुरहित स्थानमें स्थित होकर निश्चल रहता है तिसीप्रकार प्रणिधान होनेपर अन्तःकरण निश्चल होता है" ॥ ९५ ॥

अथ जीवन्मुक्तलक्षणमुच्यते । जीवन्मुक्तो नाम स्वस्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञाततत्कार्य्यसञ्चितकर्म्मसंशयविपर्य्ययादीनामपिबाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः । "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्म्माणि तस्मिन्दृष्टे परावरे"। इत्यादिश्रुतेः॥९६॥

(सं०टी०)ध्यानधारणासमाधित्रयं मनोविषयत्वात्सम्प्रज्ञासमाधेरंतरंगं यमादिकंतुबहिरंगं तथाचकेनापि पुण्येनांतरंगे

प्रथमं लब्धे सति बहिरंगलाभाय नातिप्रयासः कर्तव्यः। यद्य-पि पतंजलिना भौतिकभूततन्मात्रेन्द्रियाहंकारविषयाः संप्र-ज्ञातसमाधयो बहुधा प्रपंचिताः तथापि तेषामंतर्धानाकाश-गमनादिसिद्धिहेतुतया मुक्तिहेतुसमाधिविरोधित्वान्नास्माभिः तत्रादरः क्रियते। तथा चोक्तं वासिष्ठे। "श्रीराम उवाच। जीवन्मुक्तशरीराणां कथमात्मविदांवर। शक्तयो नेह दृश्यंते आ-काशगमनादिकाः॥ श्रीवसिष्ठउवाच। अनात्मविदमुक्तोपि सि-द्धिजालानि वांछति। द्रव्यमंत्रक्रियाकालयुक्त्याप्नोत्येवराघव॥ नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्मनात्मदृक्। आत्मना-त्मनि संतुष्टो नाविद्यामनुधावति। ये केचन जगद्भावा-स्तानविद्यामयान्विदुः। कथं तेषु किलात्मज्ञस्त्यक्त्वा वि-द्यां निमज्जति। द्रव्यमंत्रक्रियाकालयुक्तयः साधुसिद्धिदाः। परमात्मपदप्राप्तौ नोपकुर्वंति कांश्चन॥" इति। आत्मविषयस्तु सं प्रज्ञातसमाधिर्वासनाक्षयस्य निरोधसमाधेश्च हेतुः तस्मा-त्तत्रादरः कृतः। अथ पंचमभूमिकारूढचित्तस्य निरोध-लक्षणः समाधिर्निरूप्यते। तं च समाधिं सूत्रयति "व्युत्था-ननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधलक्षणाचित्तान्वयो निरोधः परिणामः" इति। व्युत्थानसंस्काराः समाधिविरोधिनः ते च निरोधहेतुना योगिप्रयत्नेन प्रतिदिनं प्रतिक्षणं वाऽभिभू-यंते तद्विरोधिनश्च निरोधसंस्काराः प्रादुर्भवंति तथा सति नि-रोध एवैकस्मिन् क्षणे चित्तमनुगच्छति सोऽयमीदृशः चित्तस्य परिणामो भवति यदा तदाऽसंप्रज्ञातसमाधिरुच्यत इत्यर्थः। ए-

तत्समाधिद्वयं जीवन्मुक्तस्यैव भवति नान्यस्येति मनसि निधाय प्रथमं जीवन्मुक्तस्य स्वरूपं प्रतिपादयितुं प्रतिजानीते । अथेति । तस्य लक्षणमाह । जीवन्मुक्तो नामेत्यादिना ब्रह्मनिष्ठ इत्यंतेन । जीवन्मुक्तो नामेति । अत्राखिलबंधरहितो ब्रह्मनिष्ठो जीवन्मुक्त इति । तस्य लक्षणं जीवतः पुरुषस्य हि कर्तृत्वभोक्तृत्वसुखदुःखलक्षणोऽखिलो यः चित्तधर्मः स क्लेशरूपत्वाद्बंधो भवति तेन रहितः परित्यक्तबंधनः ब्रह्मणि निष्ठा तदेकपरता यस्य स ब्रह्मनिष्ठः जीवन्मुक्त इत्यर्थः। सकलबंधराहित्ये हेतुमाह । स्वस्वरूपेति । गुरुश्रुतिस्वानुभवैर्ब्रह्मात्मैकत्वविज्ञानेन मूलाज्ञानतत्कार्यसंचितकर्म्मादीनामपि बाधितत्वात्सर्वसंशयाः क्षीयंते इति। तथा च श्रुतिः "भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः।क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इति ॥ ९६ ॥

(भा०टी०) अब जीवन्मुक्तका लक्षण निरूपण करते हैं। जो पुरुष अखण्ड चैतन्यस्वरूप ब्रह्मज्ञान होनेके अनन्तर अज्ञानका नाश होनेसे सर्वव्यापी चैतन्यस्वरूप ब्रह्मका साक्षात्कार करके अज्ञान और अज्ञानके कार्य,इकट्ठे कियेहुये पाप,पुण्य,संशय, और भ्रमादिको दूर करके संसार बन्धनसे विमुक्त होकर ब्रह्मनिष्ठ होता है उसको जीवन्मुक्त कहते हैं। इसका प्रमाण श्रुतिसेभी जाना जाता है-"सर्वश्रेष्ठ परब्रह्मका साक्षात्कार होनेसे हृदयका भ्रम नष्ट होता है। सम्पूर्ण संशय

दूर हो जाते हैं । और अच्छे बुरे कर्म्मोंके फल नष्ट होजातेहैं

अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादि-भाजनेन शरीरेण आन्ध्यमान्द्यापटुत्वादिभाजने-नेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभा-जनेनान्तःकरणेन च तत्तत्पूर्वपूर्ववासनया क्रिय-माणानि कर्म्माणि भुज्यमानानि ज्ञानाविरुद्धान्या-रब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यति यथा इदमिन्द्रियजालमिति ज्ञानवान् तदिन्द्रियजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। "सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव समना अमना इव सप्राणोऽप्राण इव" इत्यादिश्रुतेः । उक्तञ्च—"सुषुप्तवज्जाग्रति यो न पश्यति द्वयञ्च प-श्यन्नपि चाद्वयत्वतः ॥ तथापि कुर्वन्नपि निष्क्रि-यश्च यः स आत्मविन्नान्य इतीह निश्चयः" इति ॥ ९७ ॥

(सं०टी०) ङन्वेतादृशस्य जीवन्मुक्तस्य देहेंद्रियादिभा-नमस्ति नवेत्याशंक्य दग्धपटन्यायेनेन्द्रजालनिर्मितसौधसमु-द्रादिवच्च बाधितानुवृत्त्या मिथ्यात्वेन भानेपि परमार्थतया भा-नं नेत्याह । अयमित्यादिना न पश्यतीत्यंतेन । अस्मि-न्नर्थे श्रुतिमाह सचक्षुरिति । उक्तेर्थे आचार्यवचनं प्रमा-णयति । उक्तंचेति । इह जगति स एवात्मविन्नान्य इति मे नि-

श्वय इत्यन्वयः। स क इत्यपेक्षायामाह । य इति। यः कोपि महापुरुषो ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धिः सुषुप्त्यवस्थायां यथा द्वैतं न पश्यति तथा ब्रह्मदृष्टिदार्ढ्येन जाग्रदवस्थायामपि द्वैतं न पश्यति तद्दृष्ट्या ब्रह्मव्यतिरिक्तजडपदार्थाभावात्स तथोक्तः किंच कदाचित् व्युत्थानदशायामाविद्यकसंस्कारलेशवशाद्भिक्षाटनादिव्यवहारेण द्वयं पश्यन्नपि समाध्यभ्याससामर्थ्यवशादद्वयत्वेन पश्यति स तथोक्तः यश्च लोकसंग्रहार्थं नित्यादिकर्माणि कुर्वन्नपि आत्मनि कर्तृत्वाभावनिश्चयेन निष्क्रियः कर्मरहितो भवति कर्मफलेन न लिप्यते स जीवन्मुक्तो नात्र संशयः कर्तव्य इत्यर्थः॥९७॥

(भा०टी०) जिसप्रकार साधारण पुरुष इंद्रजालके पदार्थोंको देखकर विचार करता है कि ये इंद्रजालके पदार्थ प्रकृत दृश्यमान पदार्थ नहीं हैं। तिसीप्रकार जीवन्मुक्त पुरुष जाग्रदवस्थामें रुधिर, मांस, विष्ठा, मूत्रादिकोंका भाण्ड ऐसे शरीरद्वारा, अन्धापन, बहिरापन इत्यादि दोषोंका भाण्ड ऐसे इन्द्रियोंके द्वारा, और भूख,प्यास, शोक, मोह इत्यादि भाण्ड ऐसे अन्तःकरणद्वारा, पहिली वासनासे उत्पन्न हुए ज्ञानके विरोधी सञ्चित कर्म्मोंका फल भोगनेके अनन्तर दृश्यमान यह जगत् सत्य वस्तु नहीं होय है. इसप्रकार विचार करता है। इस विषयमें श्रुतिकाभी प्रमाण है—"जीवन्मुक्त पुरुष बाह्य वस्तुमें नेत्रयुक्त होकर नेत्रहीनकासा व्यवहार करता है, कर्ण

होनेपरभी बधिरकेसा व्यवहार करता है, मन होनेपरभी मनोहीनकेसा व्यवहार करता है, और प्राण होनेपरभी प्राणरहितकेसा व्यवहार करता है ।" और जगहभी कहा है—"जाग्रत् अवस्थामें सुषुप्तिकी तरह बाह्य वस्तुमें व्यवहार करता है जो द्वैत वस्तुकोभी अद्वैत बोले है और जो कर्म्म करता हुआभी अन्तःकरणको निष्क्रिय माने है वह ब्रह्मपरायण पुरुष निश्चय करके जीवन्मुक्त है । उससे अन्यको जीवन्मुक्त नहीं कहेहैं ॥ ९७ ॥

अस्य ज्ञानात्पूर्वं विद्यमानानामेवाहारविहारादीनां अनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति शुभाशुभयोरौदासीन्यं वा॥ तदुक्तम्—"बुद्धाद्वैतमतत्त्वस्य यथेष्टाचरणं यदि । शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे । ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः" इति ॥ ९८ ॥

(सं०टी०) नन्वस्य जीवन्मुक्तस्य योगीश्वरस्य मम पुण्यं पापं च नास्तीत्यभिमानवशाद्यथेष्टाचरणप्रसंगमाशंक्य परिहरति॥ अस्येति॥ अस्य पूर्वोक्तजीवन्मुक्तस्य ज्ञानात्प्रागेव शांत्यादिगुणैरशुभवासनाया निवारितत्वात्संसारदशायामप्रयत्नेनाहारादिप्रवृत्तिवत् तत्त्वज्ञानोत्तरमपि शुभानामेव वासनानामनुवृत्तिर्भवति नाशुभानामित्यर्थः । ननु शुभवासनानुवृत्तेरपि प्रयोजनाभावात्किं तदनुवृत्त्येत्यत आह॥ शुभाशुभयोरि-

ति ।तस्माज्जीवन्मुक्तस्य यथेष्टाचरणप्रसंगो नास्तीति भावः । अस्मिन्नर्थे ग्रंथांतरं संवादयति । तदुक्तमिति । जीवन्मुक्तस्य ब्रह्मज्ञानत्वाभिमानो नास्तीत्यत्रापि संमतिमाह । ब्रह्मवित्त्वमिति । ननु विदुषां यथेष्टाचरणप्रसंगो नास्तीत्युक्तं तदनुपपन्नं।"न मातृवधेन न पितृवधेन।यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।हत्वापि स इमाँल्लोकान्न हंति न निबध्यते।"इति। "हयमेधशतसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि परमात्मविन्न पुण्यैर्न च पापैर्लिप्यते मनुजः"।"अश्वमेधसहस्राणि ब्रह्महत्याशतानि च।कुर्वन्नपि न लिप्येत यद्येकत्वं प्रपश्यति ।सभयादभयं प्राप्तस्तदयं यतते च यः ॥स पुनः सभयं गंतुं स्वतंत्रश्चेन्नहीच्छति ।आरब्धकर्मनानात्वाद्बुधानामन्यथान्यथा ।वर्तनं तेन शास्त्रार्थे विभ्रांतव्यं न पंडितैः"इत्यादिश्रुतिस्मृत्यभियुक्तवाक्यैर्विदुषां यथेष्टाचरणत्वांगीकारादिति चेत्सत्यम्। तेषां च वचनानां विद्वत्स्तुतिपरत्वेन तत्कर्तव्यमित्यत्र तात्पर्याभावात् । तदुक्तमाचार्यैः--"अधर्माज्जायतेऽज्ञानं यथेष्टाचरणं ततः ।। धर्मकार्ये कथं तत्स्याद्यत्र धर्मो विनश्यति"इति ॥ ९८ ॥

(भा०टी०) इस पूर्वोक्त जीवन्मुक्तको ज्ञान होनेके प्रथमही शमदमादिक गुणों करकै अशुभ वासनाका नाश हो जानेसेभी संसारदशामें जैसी आहार विहार आदिकमें अभिमान रहित होकर प्रवृत्ति की जाती है. इसीही रीतिसे तत्त्वज्ञान होनेके पश्चात्भी आहारविहार आदिकोंमें प्रवृत्ति होती

है. परंतु तत्त्वज्ञान होनेके पश्चात् अशुभ वासनाकी प्रवृत्ति बिलकुल होती नहीं. केवल शुभवासनाओंकाही अनुवर्तन किया जाता है. अथवा शुभवासना तथा अशुभवासना इन दोनोंमेंभी उदासीनभाव रहता है इससे जीवन्मुक्त हुआ पुरुष यथेच्छ आचरण करता नहीं, यह सिद्ध हुआ. इस विषयमें ग्रंथांतरका यह प्रमाण है कि,—"जो कोई पुरुष एक ब्रह्मतत्त्वको जानले, और यथेच्छ आचरण करे, तो फिर अपवित्र पदार्थके भक्षणमें लगाहुआ कुत्ता, और वह ब्रह्मतत्त्ववेत्ता इन दोनोंमें भेद कौनसा रहा ?" और जो जीवन्मुक्त है उसको अपने ब्रह्मज्ञपनेका अभिमानही रहता नहीं. इसमें प्रमाण यह है कि,—"ब्रह्मवेत्तापनाको प्राप्त होकरभी जीवन्मुक्त पुरुष अपने आत्माको केवल जानता है. दूसरा कुछ जानता नहीं. अभिमानभी करता नहीं." इति ॥ ९८ ॥

तदानीममानित्वादीनि ज्ञानसाधनानि अद्वेष्टृत्वादयश्चालंकारवदनुवर्तन्ते । तदुक्तं—"उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः ॥ अयत्नतो भवन्त्यस्य न तु साधनरूपिणः" इति ॥ ९९ ॥

(सं०टी०) नन्वेवं "अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवम्" इत्यादिस्मृत्युक्तसाधनस्य 'अद्वेष्टा सर्वभूतानाम्' इत्यादिवचनैः प्रतिपाद्यमानाद्वेष्टृत्वादिगुणसमूहस्य च विदुषां संपाद्यमानत्वश्रवणात्तेन सह विरोधमाशंक्य अमानित्वादिसंपाद-

नस्य विविदिषासंन्यासविषयत्वाद्विदुषां तु लक्षणत्वेनालंकारवदनुवर्तमानान्न विरोध इत्याह। तदानीमिति। जीवन्मुक्तावस्थायामित्यर्थः। अस्मिन्नर्थे वार्तिकसंमतिमाह। तदुक्तमिति। अस्य विद्वत्संन्यासिनो जीवन्मुक्तस्याद्वेष्टृत्वादयो गुणाः अप्रयत्नेन स्वत एव भवंति,। न तु साधनरूपिणः, तं प्रति ते साधनरूपा न भवंति तत्र हेतुमाह। उत्पन्नेति। यत उत्पन्नात्मावबोधो ब्रह्मात्मैकत्वनिश्चयरूपः ततः तस्य ते गुणाः लक्षणत्वेनैव भवंतीत्यन्वयः॥ ९९ ॥

(भा०टी०) उस जीवन्मुक्त अवस्थामें अमानीपना-अदंभीपना आदिक ज्ञानसाधन, अद्वेष्टृत्व, निर्लोभत्व, अमात्सर्य, अहिंसा आदिक सद्गुण, अलंकार सरीखे उस तत्त्वज्ञानीके पीछे पीछे चले आते हैं. इस विषयमें वार्तिकग्रंथमें यह प्रमाण है कि,—"जिसको आत्मबोध उत्पन्न हुआ है,उस पुरुषको अद्वेष्टृत्व, अदंभित्व, अहिंसा आदिक गुण विना यत्नसेही होजाते हैं, परंतु वे गुण उसके साधनरूपी होते नहीं." इति ॥ ९९ ॥

किं बहुना अयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानंदपरब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्य्यसंस्काराणामपि विनाशात् परमकैव-

ल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डं ब्रह्मावतिष्ठते । "न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते विमुक्तश्च विमुच्यते" इत्येवमादिश्रुतेः ॥ ॥ १००॥ इति वेदान्तसारः समाप्तिमितः ॥

(सं०टी०) इयता प्रबंधेन प्रतिपादितेऽस्मिन्वेदांतसाराख्ये ग्रन्थे श्रीमत्परमगुरुपरमहंसपरिव्राजकाचार्यसदानन्दयोगींद्रेण महापुरुषेणाथवेदांतो नामेत्यारभ्य साधनचतुष्टयसंपन्नस्य प्रमातुरधिकारिणः मूलाज्ञाननिवृत्तिपरमानंदप्राप्तिसिद्धये प्रतीयमानाविद्यकसकलप्रपंचजातस्य ब्रह्मण्यध्यारोपापवादपुरःसरं सविस्तरं निष्प्रपंचत्वं प्रतिपाद्य तत्साधनं च श्रवणादिकं सप्रपंचमभिधाय तस्यैवाधिकारिणः तत्त्वमस्यादिवाक्यश्रवणानंतरं ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धेः जीवन्मुक्तत्वं प्रदर्शितम् । एतावतैव कार्यसिद्धिः किं बहुलेखनेनेति मनसि निधाय संप्रत्यस्यैव जीवन्मुक्तस्य स्वप्रकाशात्मानंदानुभवैकनिष्ठस्य भेदप्रतीत्यभावेऽपि अविद्यालेशवशात्प्रारब्धकर्म भुंजानो भिक्षाटनादिदेहयात्रामात्रक्रियावशिष्टो ब्रह्मभूत एवावतिष्ठत इत्युपसंहरति। किं बहुना इत्यादिना। प्रारब्धफलं त्रिविधं स्वेच्छाकृतं परेच्छाकृतं अनिच्छाकृतं चेति । तत्र व्युत्थानदशायामीश्वरप्रेरिततयास्वकीयेच्छयाकृतंस्वेच्छाकृतं भिक्षाटनादिसमाध्यवस्थायां शिष्यादिभिर्दीयमानमन्नादिकं परेच्छाकृतम् । समाध्यवस्थायां व्युत्थानदशायां वा आकाशफलपातवदकस्माज्जायमानं पाषाणपतनकंटकवेधादिकमनि-

च्छाकृतम्। स चायं जीवन्मुक्तः प्रोक्तत्रिविधप्रारब्धप्रापिकं सुखदुःखमनुभवन्बुद्ध्यादिसाक्षितया सर्वावभासकः सन्भोगेनारब्धकर्म्मक्षये सति प्रत्यगभिन्नपरमात्मनि प्राणादिलयानंतरं प्रनष्टाविद्यकसंसारः कृतकृत्यः सन् गलितसकलभेदप्रतिभासो ब्रह्मैवावतिष्ठते इति सकलवेदरहस्यतात्पर्यमित्यर्थः। अयं जीवन्मुक्तो बुद्ध्याद्युपाधिविलये सति घटाद्युपाधिविनिर्मुक्ताकाशवन्मुक्तइत्युपचारव्यवहारभाग्भवति बद्धत्वस्याप्यवास्तवत्वात्। तदुक्तमाचार्यैः। "न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वा मुक्त इत्येषा परमार्थता।"अस्यजीवन्मुक्तस्योपाधिविगमसमयेप्राणाख्यंलिंगशरीरं अतितप्तलोहक्षिप्तनीरबिंदुवत्प्रत्यगभिन्नपरमानंदे लीनत्वात्स्थूलशरीरंनोत्तिष्ठतीति। अत्र श्रुतिमाह। न तस्येति। अयं जीवन्मुक्तो जीवन्नेव दृश्यमानाद्रागद्वेषादिबंधनाद्विशेषेण मुक्तः सन् वर्तमानदेहपाते सति भाविदेहबंधाद्विशेषेण मुच्यत इत्यत्रापि श्रुतिमाह। विमुक्तश्चेति बृहदारण्यकेपि "यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि स्थिताः। अथ मर्त्यो मृतो भवत्यत्र ब्रह्म समश्नुते"इति। वासिष्ठेपि"जीवमुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते।भवत्यदेहमुक्तत्वं पवनोस्पंदतामिव" इति"असंगो ह्ययं पुरुष आकाशवत्सर्वगतश्च नित्यः।अस्नाविरं शुद्धमपापविद्धम्"इत्यादिश्रुत्या प्रत्यगात्मनो नित्यत्वपरिपूर्णत्वकूटस्थत्वश्रवणात् उत्पत्त्याप्तिविकृतिसंस्कारचतुर्विधक्रियाफलविलक्षणत्वेन विद्यया नित्यनिवृत्ताविद्यामात्रेण प्राप्त एवात्मा पुनःप्राप्त

एवेत्युपचर्यते अधिष्ठानस्य गमनाभावेऽध्यस्तस्य लोकांतरगम-
नायोगान्नसालोक्यादिमुक्तिसंभवः। नन्वप्राप्तस्यक्रियासाध्यस्य
वस्तुनो विद्यमानानर्थनिवृत्तेश्च पुरुषार्थत्वं दृष्टं अत्र तदभावा
त्कथं पुरुषार्थत्वमिति चेत्, न। तयोरेव पुरुषार्थत्वमिति नि-
यमाभावात्।स्वच्छायायामारोपितरक्षसा विस्मृतकंठगतचा-
मीकरस्य भ्रांतपुरुषस्याप्तवाक्येन तयोर्निवृत्त्या तयोरपि पुरु-
षार्थत्वदृष्टेः। अत्र संग्रहः "आत्माज्ञानमलं निरस्तममलं
प्राप्तं च तत्त्वं परं कंठस्थाभरणादिवद्भ्रमवशाच्छायापिशाची
यथा। आप्तोक्त्याप्तिनिवृत्तिवच्छ्रुतिशिरोवाक्याद्गुरोरुत्थिता-
द्ध्वस्तध्वांतनिरासतः परसुखं प्राप्तं तयोरुच्यते" इति।
न च मुक्तानां अपि वसिष्ठभीष्मप्रभृतीनामपरोक्षज्ञानिनां पु-
नर्देहांतरश्रवणात्केवलं ज्ञानोत्पत्तिसमय एवाल्पज्ञानिनामस्मा-
कं मुक्तिर्भवतीति कथं विश्वसिमः अतो ज्ञानव्यतिरिक्तमप्यु-
पायांतरं किंचित्कर्तव्यमिति वाच्यं। शास्त्रप्रामाण्यादेव तदुप-
पत्तेः।"ब्रह्मविद्ब्रह्मैव भवति।तरति शोकमात्मवित्"इत्यादिश्रु-
तिभिर्ज्ञानोत्पत्तिसमय एव मुक्तिप्रतिपादनात्।तदुक्तंशेषेण"ती-
र्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन्देहम्। ज्ञानसमकाल-
मुक्तः कैवल्यं याति हतशोकः"इति वसिष्ठादीनां त्वधिकारि-
कपुरुषत्वेन यावदधिकारं प्रारब्धवेगप्रयुक्तशापादिनास्वीकृता-
वांतरदेहपातेपितद्देहभाविभोगस्य निवारयितुमशक्यत्वात्प्रार-
ब्धस्य विना भोगेन क्षयानुपपत्तेः यावदधिकारमवस्थितिरधि-
कारिकाणामिति भगवद्व्यासैर्विशेषितत्वात्। अस्मदादीनां च

प्रारब्धकर्मणोऽनेकदेहारंभकत्वसंभवेऽपि चरमदेहं विनाऽपरोक्षज्ञानोत्पत्तेरसंभवात् वामदेवे तथा दृष्टत्वात् । अन्यथा गर्भस्थस्य श्रवणाद्यभावेन ज्ञानोत्पत्त्यनुपपत्तेः । ननु ज्ञानिनामपि स्वप्नावस्थायां देहांतरस्वीकारवन्मुक्तानामपि पुनर्देहांतरस्वीकारः किं न स्यादिति चेत्। न। "कंठे स्वप्ने समाविशेत्" इत्यादिवाक्येषु कंठान्निर्गमनाभावश्रणाद्देहांतरप्राप्तेस्तु "तदनंतरप्रतिपत्तौ" इत्यत्र देहान्निर्गमनश्रवणाद्वैषम्यम् । तदुक्तं स्कांदे "यस्मिन्देहे दृढं ज्ञानमपरोक्षं विजायते । तद्देहपातपर्यंतमेव संसारदर्शनं। पुरापि नास्ति संसारदर्शनं परमार्थतः। कथं तद्दर्शनं देहविनाशादूर्ध्वमुच्यते। तस्माद्ब्रह्मात्मविज्ञानं दृढं चरमविग्रहे। जायते मुक्तिदं ज्ञानं प्रसादादेव मुच्यते" इति। तस्मात्सुष्ठूक्तं "विमुक्तश्च विमुच्यते" इति। नित्यशुद्धपरिपूर्णमद्वयं सच्चिदात्मकमखंडमक्षरं। सर्वदासुखमबोधतत्कृतैर्वर्जितं सदहमस्मितत्परम्. गोवर्द्धनोद्धरणप्रेरणया विमुक्तक्षेत्रे पवित्रे नरसिंहयोगी। वेदान्तसारस्य चकार टीकां सुबोधिनीं विश्वपतेः पुरस्तात् ॥ जाते पंचशताधिके दशशते संवत्सराणां पुनःसंजाते दशवत्सरेप्रभुवरश्रीशालिवाहे शके। प्राप्ते दुर्मुखवत्सरे शुभशुचौ मासे नवम्यां तिथौ प्राप्ते भार्गववासरे नरहरिष्टीकां चकारोज्ज्वलाम् । इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्रामानंदभगवत्पूज्यपादशिष्य नृसिंहसरस्वतीविरचिता वेदान्तसारस्य टीका समाप्ता १००

(भा०टी०) बहुत कहनेसे क्या होगा? यह जीवन्मुक्त पुरुष शरीरयात्राके निर्वाहके अर्थ इच्छा, अनिच्छा,

और परेच्छा इन तीन प्रकारके प्रारब्ध कर्म्मोंसे उत्पन्न हुए सुख दुःखका अनुभव करता हुआ साक्षी चैतन्यरूपबुद्धि आदिका प्रकाशक होता हुआ प्रारब्ध कर्म्मोंके भोगके अन्तमें सच्चिदानन्दरूप परब्रह्ममें प्राणोंके लीन होनेपर अज्ञान और अज्ञानके कार्य्य स्वरूप पूर्व संसारके विनाशका हेतु परम कैवल्यरूप सच्चिदानन्दमय अद्वैत पूर्णब्रह्ममें अवस्थित होकर अनिर्वचनीय कैवल्यानन्दका भोग करता है । इस विषयमें प्रमाणभी है—"जीवन्मुक्त पुरुषके देहका त्याग करनेपर सम्पूर्ण अन्यलोकोंको नहीं जाते हैं । उसी सच्चिदानन्दमय परब्रह्ममें लीन होजाते हैं और असार संसारके बन्धनसे छूटकर परम ब्रह्मानन्दमें निमग्न हो जाता है" ॥ १०० ॥

इतिश्रीपरमहंसपरिव्राजकाचार्य्यश्रीसदानन्दयोगीन्द्रविरचितं वेदान्तसारप्रकरणं रामपुरवास्तव्य—त्रिवेदभोलानाथात्मजरामस्वरूपविरचितस्वरूपप्रकाशभाषासहितं समाप्तिमफाणीत् ।

पुस्तक मिलनेका ठिकाना--

खेमराज श्रीकृष्णदास,

"श्रीवेङ्कटेश्वर" छापाखाना (मुंबई.)

विक्रय्यपुस्तकें ।

नाम.	की रु. आ.
ऋग्वेदसंहिता	४—०
यजुर्वेदसंहिता (वाजिसनेयी सर्वानुक्रमणिका याज्ञवल्क्य शिक्षा व स्वरसहित मोटे टैपमें शुद्धता पूर्वक मन्त्रोंकी अकारादि अनुक्रमणिका समेत	३—०
द्वादशउपनिषद्मूल स्थूलाक्षर शांती सहित ...	३—०
अष्टादशोपनिषद् रेशमी गुटका [अठारहों उपनिषद् पाठ करने योग्य] ..	१—०
मंत्रसंहिता यजुर्वेदी	०—६
रुद्री यजुर्वेदी	०—४
दंडक यजुर्वेदी	०—४
पितृसंहिता	०—१॥
पारस्कराचार्यकृत "गृह्यसूत्र" हरिहरभाष्यसहित	१—८
पुरुषसूक्त श्रीसूक्त	०—१
मंत्रार्थदीपिका सटीक	१—८
शारीरक (शांकरभाष्य) रत्नप्रभाटीका व्यासाधिकरणमाला और भक्तिसूत्र सभाष्य अक्षर बडा	१०—०
ब्रह्मसूत्र (शारीरक) भाषाटीका ..	१—८
पंचदशीसटीक	२—८

नाम.	की. रु. आ.
पंचदशी पं० मिहिरचंद्रकृत अत्युत्तम भाषाटीका सहित	४–०
पंचदशी भाषा–आत्मस्वरूजीकृत ..	४–०
गीता चिद्घनानंदस्वामिकृत गूढार्थदीपिका मूल अन्वय पदच्छेदके सहित भाषाटीका ..	७–०
गीता आनंदगिरिकृतभाषाटीका ..	३–०
श्रीमद्भगवद्गीता सान्वयब्रजभाषा दोहासहित ..	१–४
गीतामृततरंगिणी भाषाटीका (रघुनाथप्रसाद-कृत) अक्षरबड़ा	१–४
गीतामृततरंगिणी भाषाटीका पाकिटबुक् ..	०–१२
श्रीरामगीता मूल	०–२
श्रीरामगीता भाषाटीका–पदप्रकाशिका अनुवाद समुच्चय और विषमपदीके सहित ..	०–८
श्रीमद्भगवद्गीतापंचरत्नअक्षरमोटागुटकारेशमी ..	१–०
" पंचरत्न अक्षरबडा खुलापत्रा छोटीसंची ..	१–८
" पंचरत्न अक्षरबडा लंबीसंची खुला ..	१–०
" पंचरत्न भाषाटीका	२–०
गीता श्रीधरीटीका सहित	१–०
गीता बडे अक्षरकी १६ पेजी गुटका	१–१२
गीता बडेअक्षरकी खुली १२ पेजी ..	०–१०

नाम.		की. रु. आ.
गीता गुटका विष्णुसहस्रनाम सहित	..	०--८
गीतापंचरत्न और एकादश रत्न	..	०--१२
" पंचरत्न द्वादशरत्न ..	..	०--१०
गीतापंचरत्न नवरत्न पाकिट बुक्	..	०--७
गीता गुटका पाकिट बुक् ..	..	०--५
अष्टावक्रगीता अत्युत्तम सान्वय भाषाटीका ..		१--०
शिवगीता भाषाटीकासहित	..	०--१२
गणेशगीता भाषाटीकासहित	..	०--६
गीतापंचदश भाषाटीका-[काश्यपगीता, शौनकगीता, अष्टावक्रगीता, नहुषगीता, सरस्वतीगीता, युधिष्ठिरगीता, बकगीता, धर्मव्याधगीता, श्रीकृष्णगीतादि] ...	..	०--१२
पाण्डवगीता भाषाटीकासह	..	०--३
तथा मूल ४ रत्न बडा अक्षर	..	०--२
अपरोक्षानुभूति संस्कृत टीका भाषाटीकासहित		०--१०
आत्मबोध भाषाटीका ..	..	०--३
तत्त्वबोध भाषाटीका ..	..	०--२
वेदांतग्रंथपंचकम्(वाक्यप्रदीपःवाक्यसुधारसः हस्तामलकःनिर्वाणपंचकं मनीषापंचकं) स०		--८
वेदस्तुति भाषाटीकासह ..		०--८

नाम.			की. रु. आ.
गीता रामानुजभाष्य	..	..	२—०
वेदांत डिम्डिम्	..	..	०—१॥
वैराग्यभास्कर भाषाटीका	..	..	०—८
सिद्धांतचंद्रिका सटीक (वेदांत)		..	०—८
हरिमीडेस्तोत्रसटीक.	..	..	०—१४
द्वादशमहावाक्यविवरण	..	..	०—४
त्रोटक सटीक	..	..	०—१०
वेदांतरामायण भाषाटीकासह		..	१—८
वेदान्तसंज्ञा भाषाटीका		..	०—८
शांडिल्यसूत्र सभाष्य (भक्तिमीमांसा)		..	०—८
प्रश्नोत्तर मुक्तावली भाषाटीका (वेदान्त)		..	०—३
जीवन्मुक्तगीता भाषाटीका	..	..	०—१
भक्तिमीमांसा-शांडिल्यऋषिप्रणीताचार्य स्वप्नेश्वरविरचितेन भाष्येण संयुता		..	०—८
योगवासिष्ठ सटीक संस्कृत	..	..	२०—०
आत्मपुराण भाषा [चिद्धनानन्द स्वामिकृत]		..	१३—०
योगवासिष्ठभाषा बड़ा संपूर्ण	..	..	१२—०
योगवासिष्ठगुटकावैराग्य मोक्ष प्रकरण वेदांत उत्तम कागज अक्षर बड़े	..	..	०—१२
वासिष्ठसार भाषा वेदांत ६ प्रकरण		..	२—८

नाम.	की. रु. आ.
विचारसागर सटीक निश्चलदासजीकृत ..	२—०
एकादशस्कंध भाषा चतुरदासकृत और नानकविलास	१—०
अमृतधारा वेदांत	०—१२
संतोषसुरतरु वेदांत	०—८
संतप्रभाव वेदांत	०—६
विचारमालासटीकपंचीकरणसहित ..	०—१२
अभिलाषसागर भाषा (वेदांत) ..	२—०
आत्माबोधतत्त्वबोधवेदस्तुति भाषा ..	०—३
अध्यात्मप्रकाश भाषा (वेदान्त) ..	०—३
विज्ञानगीता कविकेशवदासकृत ..	०—१०
सुंदरविलास (ज्ञानसमुद्र, ज्ञानाविलास, सुन्दराष्टकादि सहित) सटिप्पण ..	१—०
प्रत्येकानुभव शतक भाषा (वेदान्त ग्रंथ) ..	०—४
पक्षपातरहित अनुभवप्रकाश--वेदांत वर्णन (कामलीवाले बाबाकी बनाईहुई) ..	३—०
मुक्तिकोपनिषद् भाषाटीका	०—५
कैवल्योपनिषद्	०—१
मोक्षगीता बड़ी (सवालक्ष) रामनाम ..	१—०
वृत्तिप्रभाकर स्वामीनिश्चलदासकृत (वेदान्तका ग्रंथ शुद्धकर नयाछपाहै) ..	३—०

नाम.	की. रु. आ.
आनन्दामृतवर्षिणी वेदान्त (आनन्दगिरिजी-- प्रणीत-गीताकेकठिनस्थलोंकाप्रतिपादनहै) ..	०-१२
दशोपनिषद्भाषा-स्वामी अच्युतानंदकृत ..	२-०
तत्त्वानुसंधानभाषा	२-०

भाषा-पुस्तक.

श्रीमद्गोस्वामितुलसीदासकृत-रामायण ।

श्रीरामचरित मानस-[गोस्वामितुलसीदास-जीकी हस्तलिखित प्रतिसे चतुर्थावृत्ति केस-रियानिवासी कोदौरामजीके द्वारा प्राप्तकर मोटे अक्षरोंमें छापी है]	३-०
श्रीरामचरितमानस उत्तम छोटा गुटका [पाकिटबुक] सुनेहरी जिल्दका ..	०-१०
" सादी जिल्दका	०-८
तुलसीकृत रामायण सटीक लवकुशकांडस-हित प्रत्येक दोहा चौपाईका अर्थ पंडित-ज्वालाप्रसादजी कृत भाषाटीका अतिउत्तम संपूर्ण क्षेपकोंके अर्थ और माहात्म्य तुलसी दासजीका जीवनचरित व गूढ़ार्थ व राम व-नवासतिथिपत्र कोष और हनुमान्‌जीका चित्र व सूर्यवंशकावृक्षसहित सुन्दर जिल्द	८-०
तथा रफ़ कागजकी	७-०

नाम.	की. रु. आ.
तुलसीकृत रामायण सटीक ऊपरके सर्व अलंकारों समेत सुन्दर छोटे अक्षरमें छपी तयार है ..	५—०
तथा रफ्	४—०
तुलसीकृतरामायण बडे टाइपका अतिउत्तम मये श्लोकार्थ, गूढार्थ, प्रसंगार्थ, छन्दार्थ, व अष्टम लवकुशकांड व इतिहास व तुलसी दासजीका जीवन चरित्र और पंचीकरण, रामचंद्रजीके वनवासका तिथिपत्र व दृष्टांत व बरवा रामायण सहित ३८०० टिप्पणीके जिसमें संपूर्ण क्षेपक और कोषभी है ग्लेज	५—०
तथा रफ् कागजका	४—०
तुलसीकृतरामायण क्षेपकसह मझले टाईप का अति उत्तम मये श्लोकार्थ व गूढार्थ व छन्दार्थ व प्रसंगार्थ व अष्टम लवकुश कांड व इतिहास व दृष्टांत व रामवनवास तिथिपत्र व तुलसीदासका जीवन चरित्र व बरवा रामायण व माहात्म्य व हनुमान्जीका बडाचित्र व सूर्यवंशकावृक्ष सहित ३८०० टिप्पणीके जीसमें सम्पूर्ण क्षेपक हैं ग्लेज	२—४
तथा रफ् कागजका	१—८